पहले पात्र (सकोरे) में — ॐ शान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु । ॐ वृद्धिरस्तु । ॐ अविघ्नमस्तु । ॐ आयुष्यमस्तु । ॐ आरोग्यमस्तु । ॐ शिवमस्तु । ॐ शिवं कर्मास्तु । ॐ कर्मसमृद्धिरस्तु । ॐ धर्मसमृद्धिरस्तु । ॐ वेदसमृद्धिरस्तु । ॐ शास्त्रसमृद्धिरस्तु । ॐ धनधान्यसमृद्धिरस्तु । ॐ पुत्रपौत्रसमृद्धिरस्तु । ॐ इष्टसम्पदस्तु ।

दूसरे पात्र (सकोरे) में - ॐ अरिष्टनिरसनमस्तु । ॐ यत्पापं रोगोऽशुभमकल्याणं तद् दूरे प्रतिहतमस्तु ।

पुनः पहले पात्र में – ॐ यच्छ्रेयस्तदस्तु । ॐ उत्तरे कर्मणि निर्विघ्नमस्तु । ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु । ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् ।ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसम्पदस्तु । ॐ तिथिकरणमुहूर्त - नक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् । ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम् । ॐ दुर्गापाञ्चाल्यौ प्रीयेताम् । ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् । ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् । ॐ वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् । ॐ माहेश्वरीपुरोगा उमावातरः प्रीयन्ताम् । ॐ अरुन्धतीपुरोगा एकपत्यः प्रीयन्ताम् । ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् । ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ॐ ऋषयश्छन्दांस्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम् । ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् । ॐ श्रीसरस्वत्यौ प्रीयेताम् । ॐ श्रद्धामेधे प्रीयेताम् । ॐ भगवती कात्यायनी प्रीयताम् । ॐ भगवती माहेश्वरी प्रीयताम् । ॐ भगवती ऋद्धिकरी प्रीयताम् । ॐ भगवती वृद्धिकरी प्रीयताम् । ॐ भगवती पुष्टिकरी प्रीयताम । ॐ भगवती तुष्टिकरी प्रीयताम् । ॐ भगवन्तौ विघ्नविनायकौ प्रीयताम् । ॐ सर्वाः कुलदेवताः प्रीयन्ताम् । ॐ सर्वा वामदेवताः प्रीयन्ताम् । ॐ सर्वा इष्टदेवताः प्रीयन्ताम् ।

दूसरे पात्र में – ॐ हताश्च ब्रह्मद्विषः । ॐ हताश्च परिपन्थिनः । ॐ हताश्च कर्मणो विघ्नकर्तारः । ॐ शत्रवः पराभवं यान्तु । ॐ शाम्यन्तु घोराणि । ॐ शाम्यन्तु पापानि । ॐ शाम्यन्त्वीतयः । ॐ शाम्यन्तूपद्रवाः ॥

पहले पात्र में – ॐ शुभानि वर्धन्ताम् । ॐ शिवा आपः सन्तु । ॐ शिवा ऋतवः सन्तु । ॐ शिवा ओषधयः सन्तु । ॐ शिवा वनस्पतयः सन्तु । ॐ शिवा अतिथयः सन्तु । ॐ शिवा अग्नयः सन्तु । ॐ शिवा आहुतयः सन्तु । ॐ अहोरात्रे शिवे स्याताम् ।

ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

ॐ शुक्राङ्गारकबुधबृहस्पतिशनैश्चर राहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहा प्रीयन्ताम् । ॐ भगवान् नारायणः प्रीयताम् । ॐ भगवान् पर्जन्यः प्रीयताम् । ॐ भगवान् स्वामी महासेनः प्रीयताम् । ॐ पुरोऽनुवाक्यया यत्पुण्यं तदस्तु । ॐ याज्यया यत्पुण्यं तदस्तु । ॐ वषट्कारेण यत्पुण्यं तदस्तु । ॐ प्रातः सूर्योदये यत्पुण्यं तदस्तु ।

इसके बाद यजमान कलश को कलश के स्थानपर रखकर पहले पात्र में गिराये गये जल से मार्जन करे । परिवार के लोग भी मार्जन करें । इसके बाद इस जल को घर में चारों तरफ छिड़क दे । द्वितीय पात्र में जो जल गिराया गया है, उसको घर से बाहर एकान्त स्थान में गिरा दे ।

अब यजमान हाथ जोड़कर ब्राह्मणों से प्रार्थना करे –

यजमान – ॐ एतत्कल्याणयुक्तं पुण्यं पुण्याहं वाचयिष्ये ।

ब्राह्मण – वाच्यताम् ।

इसके बाद यजमान फिरसे हाथ जोड़कर प्रार्थना करे –

यजमान – ॐ ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम् ।

(पहली बार) वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥

भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे

करिष्यमाणस्य अमुककर्मणः पुण्याहं भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ पुण्याहम् ।

यजमान – भो ब्राह्मणाः ! मम . . . करिष्यमाणस्य अमुककर्मणः (दूसरी बार) पुण्याहं भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ पुण्याहम् ।

यजमान – भो ब्राह्मणः ! मम . . . करिष्यमाणस्य अमुककर्मणः (तीसरी बार) पुण्याहं भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ पुण्याहम् ।

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

यजमान – पृथिव्यामुद्धतायां तु यत्कल्याणं पुरा कृतम् ।
(पहली बार) ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ।
भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्यमाणस्य अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ कल्याणम् ।

यजमान – भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे (दूसरी बार) करिष्यमाणस्य अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ कल्याणम् ।

यजमान – भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे (तीसरी बार) करिष्यमाणस्य अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ कल्याणम् ।

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ।
ब्रह्मराजन्याभ्या ँ शूद्राय चार्याय च स्वाय चारणाय च ।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं म कामः समृद्ध्यतामुप भादो नमतु ।

यजमान – ॐ सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ।
(पहली बार) सम्पूर्णा सुप्रभावा च तामृद्धिं प्रब्रुवन्तु नः ॥

भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे
करिष्यमाणस्य अमुककर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ ऋद्ध्यताम् ।

यजमान – भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे (दूसरी बार)
करिष्यमाणस्य अमुककर्मणः ऋद्धिं भवन्तो ब्रवन्तु ।

ब्राह्मण – ॐ ऋद्ध्यताम् ।

यजमान – भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे
(तीसरी बार) करिष्यमाणस्य अमुक कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ ऋद्ध्यताम् ।
ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिर्मृता अभूम ।
दिवं पृथिव्या अध्याऽरुहामाविदाम देवान्त्स्वजर्यतिः ॥

यजमान – ॐ स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा ।
(पहली बार) विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः ॥
भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे
करिष्यमाणस्य अमुककर्मण स्वस्ति भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ आयुष्मते स्वस्ति ।

यजमान – भो ब्राह्मणः ! मम सकुटुम्बस्य सपरिवारस्य गृहे (दूसरी बार)
करिष्यमाणस्य अमुककर्मणे स्वस्ति भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ आयुष्मते स्वस्ति ।

यजमान – भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे
(तीसरी बार) करिष्यमाणस्य अमुककर्मणे स्वस्ति भवन्तो ब्रुवन्तु ।

ब्राह्मण – ॐ आयुष्मते स्वस्ति ।
ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

यजमान – ॐ समुद्रमथनाज्जाता जगदानन्दकारिका ।
(पहली बार) हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥

भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे
करिष्यमाणस्य अमुककर्मणः श्रीरस्तु इति भवन्तो ब्रुवन्तु ।

ब्राह्मण — ॐ अस्तु श्रीः ।

यजमान — भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे
(दूसरी बार) करिष्यमाणस्य अमुककर्मणः श्रीरस्तु इति
भवन्तो ब्रुवन्तु ।

ब्राह्मण — ॐ अस्तु श्रीः ।

यजमान — भो ब्राह्मणाः ! मम सकुटुम्बस्य सपरिवारस्य गृहे
(तीसरी बार) करिष्यमाणस्य अमुककर्मणः श्रीरस्तु इति
भवन्तो ब्रुवन्तु ।

ब्राह्मण — ॐ अस्तु श्रीः ।
ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि
रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥

यजमान — ॐ मृकण्डुसूनोरायुर्यद् ध्रुवलोमशयोस्तथा ।
आयुषा तेन संयुक्ता जीवेत शरदः शतम् ॥

ब्राह्मण — ॐ शतं जीवन्तु भवन्तः ।
ॐ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥

यजमान — ॐ शिवगौरीविवाहे या या श्रीरामे नृपात्मजे ।
धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि ॥

ब्राह्मण — ॐ अस्तु श्रीः ।
ॐ मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूना ँ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥

यजमान — प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् ।
भगवाञ्छाश्वतो नित्यं नो वै रक्षतु सर्वतः ॥

ब्राह्मण — ॐ भगवान् प्रजापतिः ताम् ।
ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वय ँ् स्याम पतयो रयीणाम् ॥

यजमान — आयुष्मते स्वस्तिमते यजमानाय दाशुषे ।
श्रिये दत्ताशिषः सन्तु ऋत्विरिभर्वेद् पारगैः ॥
देवेन्द्रस्य यथा स्वस्ति यथा स्वस्ति गुरोर्गृहे ।
एकलिङ्गे यथा स्वस्ति तथा स्वस्ति सदा मम ॥

ब्राह्मण — ॐ आयुष्मते स्वस्ति ।
ॐ प्रति पन्थामपद्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥
ॐ पुण्याहवाचनसमृद्धिरस्तु ॥

यजमान — अस्मिन् पुण्याहवाचने न्यूनातिरिक्तेः यो विधिरूपविष्ट–
ब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च परिपूर्णोऽस्तु ।

दक्षिणा का संकल्प — कृतस्य पुण्याहवाचनकर्मणः समृद्ध्यर्थं
पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो इमां दक्षिणां
विभज्य अहं दास्ये ।

ब्राह्मण — ॐ स्वस्ति ।

अभिषेक

पुण्याहवाचनोपरान्त कलश के जल को पहले पात्र में गिरा ले । अब अविधुर (जिनकी धर्मपत्नी जीवित हो) ब्राह्मण उत्तर या पश्चिम मुख होकर दूब और पल्लव के द्वारा इस जल से यजमान का अभिषेक करे । अभिषेक के समय यजमान अपनी पत्नी को बायीं[१] तरफ कर ले । परिवार भी वहाँ बैठ जाय । अभिषेक के मन्त्र निम्नलिखित हैं —

---

* १. आशीर्वादेऽभिषेके च पादप्रक्षालने तथा । शयने भोजने चैव पत्नी तुत्तरतो भवेत ॥

ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥
ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्त्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥
ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ।
ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद ॥
ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा
साम्राज्येनाभिषिञ्चाम्यसौ ॥ (शु.य. ९ ।३०)
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा
साम्राज्येनाभिषिञ्चाम्यसौ ॥ (शु.य. ९ ।३०)
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यत्तुर्थन्त्रेणाग्नेः साम्राज्येनाभिषिंचामि ॥ (शु.य. १८ ।३७)
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै
भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै
यशसेऽभिषिञ्चामि ॥ (शु.य. २० ।३)
ॐ विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रंतन्न आ सुव ॥
ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ॥ (शु.य. १८ । ७६)
ॐ त्वं यविष्ठ दाशुषो नॄँ पाहि शृणुधी गिरः ।
रक्षा तोकमुत त्मना ॥ (शु.य. १८ । ७७)
ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवि शान्तिरापः
शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः
शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥
यतो यतः समीहसे ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥

सुशान्तिर्भवतु ।

सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामाभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥
शान्तिः पुष्टिस्तुष्टिश्चास्तु । अमृताभिषेकोऽस्तु ॥

दक्षिणादान – ॐ अद्य . . . कृतैतत्पुण्याहवाचनकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्ति मनसोद्दिष्टां दक्षिणां भज्य दातुमहमुत्सृजे ।

• • •

षोडशमातृका-पूजन

षोडशमातृकाओं की स्थापना के लिये पूजक दाहिनी ओर पाँच खड़ी पाइयों और पाँच पड़ी पाइयों का चौकोर मण्डल बनाये। इस प्रकार सोलह कोष्ठक बन जायेंगे। पश्चिम से पूर्व की ओर मातृकाओं का आवाहन और स्थापन करे। कोष्ठकों में रक्त चावल, गेहूँ या जौ रख दे। पहले कोष्ठक में गौरी का आवाहन होता है, गौरी के आवाहन के पूर्व गणेश का भी आवाहन पुष्पाक्षतों द्वारा इसी कोष्ठक में करे। इसी प्रकार अन्य कोष्ठकों में भी निम्नाङ्कित मन्त्र पढ़ते हुए आवाहन करे।

षोडशमातृका-चक्र

पूर्व

आत्मनः कुलदेवता १६	लोकमातरः १२	देवसेना ८	मेधा ४
तुष्टिः १५	मातरः ११	जया ७	शची ३
पुष्टिः १४	स्वाहा १०	विजया ६	पद्मा २
धृतिः १३	स्वधा ९	सावित्री ५	गौरी १ गणेश

आवाहन एवं स्थापन –

१ – ॐ गणपतये नमः, गणपतिमावाहयामि, स्थापयामि।
ॐ गौर्यै नमः, गौरीमावाहयामि, स्थापयामि।

षोडशमातृका–पूजनम्

१. गौरी–गणेश –

गजवक्र गणाध्यक्ष सर्व विघ्नविनाशन ।
लम्बोदर त्रिनेत्राढ्य आगच्छ गणनायक ॥१ ॥
ॐ गणानां त्वा गणपति ँ हवामहे प्रियाणां
त्वा प्रियपति ँ हवामहे नीधीनांत्वानिधि ।
पति ँ हवामहे वसो मम । आहमजानि
गर्भधमात्मजासि गर्भधम् ॥१ ॥
श्री गणपतये नमः ॥ गणपतिमावाहयामि स्थापयामि ॥
हिमाद्रितनयां देविं वरदां शङ्करप्रियाम् ॥
लंबोदरस्य जननीं गौरीमावाहयाम्यहम् ॥१ ॥
आयंगौः पृश्निरक्रमीद सदम्नातरं पुरः ।
पितरंच प्रयन्त्स्वः ॥१ ॥
ॐ भूर्भुवः स्वः गौर्यै नमः गौरीमावाहयामि स्थापयामि ॥

२. पद्मा –

सुवर्णाढ्यां पद्म हस्तां विष्णोर्वक्षस्थले स्थिताम् ।
त्रैलोक्य पूजितां देवी पद्मामावाह्याम्यहम ॥२ ॥
ॐ हिरण्यरूपाऽउषा सोविरोकउभाविंद्राऽउदिथः सूर्यश्च ॥
आरोहतं–वरुणामित्रगर्तर्न्ततश्चक्षाथामदितिंदितिंच
मित्रोसिवरुणोसि ॥२ ॥
ॐ भूर्भुवः स्वः पद्मायै नमः पद्मामावाहयामि स्थापयामि ॥

३. शची –

उत्पलाक्षीं सुवदनां शशि कुंडलधारिणीम् ।
देवराजप्रियां भद्रांशचीमावाह्याम्यहम् ॥३ ॥

ॐ कदाचनस्तरीरसिनेन्द्रसश्चासि दाशुषे ।
उपोपेन्नुमघवन्मूयऽइन्नुतेदानं देवस्य पृच्यते ॥३ ॥
ॐ भूर्भुवः स्वः शच्यै नमः शचीं आवाहयामि स्थापयामि ॥

४. मेधा –

मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रमश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥४ ॥
ॐ भूर्भुवः स्वः मेधायै नमः मेधां आवाहयामि स्थापयामि ॥
जगत्स्त्रष्ट्रीं जगद्धात्रीं पत्नीं रूपेण संस्थितां ।

५. सावित्री –

ॐ काराक्षीं भगवतीं सावित्रीमाह्वयाम्यहम् ॥५ ॥
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥५ ॥
ॐ भूर्भुवः स्वः सावित्र्यै नमः सावित्रीं आवाहयामि स्थापयामि ॥

६. विजया –

दैत्यक्षयकरीं देवीं देवानां चाभयप्रदाम् ।
गीर्वाणवंदितां देवीं विजयामाह्वयाम्यहम् ॥
ॐ विज्यंधनुः कपर्दिनोव्विशल्योबाणवा ँ् उत ॥
अनेशन्नस्ययाऽइषवऽआमुभरस्य निषंगधिः ॥
ॐ भूर्भुवः स्वः विजयायै नमः विजयां आवाहयामि स्थापयामि ॥

७. जया –

विष्णुरुद्रार्कशक्रादि गीर्वाणेषु व्यवस्थितां ।
त्रैलोक्य वंदितां देवीं जयामावाहयाम्यहम् ॥
ॐ यातेरूद्रशि वातनूर घोरा पापकाशिनी ।
तयानस्तन्वाशंत मया गिरि शंताभिचाकशीहि ॥
ॐ भूर्भुवः स्वः जयायै नमः जयां आवाहयामि स्थापयामि ॥

८. देवसेना –

कोष्ठे बाह्यो मयूर वाहनारूढां शक्ति खड्ग धनुर्द्धराम् ।

आवाहयेरद्देवसेनां तारकासुरमर्दिनीम् ॥
ॐ देवानां भद्रासुमति ऋजूयतां देवाना राति
रभिनोनिवर्तताम् ॥ देवानां सख्यमुपरोदिमां
व्ययन्देवान आयुः प्रतिरंतु जीव से ॥
ॐ भूर्भुवः स्वः देवसेनायै नमः देवसेनां आवाहयामि स्थापयामि ॥

९. स्वधा –

कव्यमादाय सततं पितृभ्यो या । प्रयच्छति पितृलोकार्चितां
देवीं स्वधामावाहयाम्यहम् ॥
ॐ पितृभ्यः स्वधायिभ्यस्वधाः नमः पितामहेभ्यः
स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः
स्वधायिभ्यः स्वधा नमः अक्षन्पितरोऽमीमदंत
पितरोऽतीतृ पंत पितरः पितरः शून्धध्वम् ॥
ॐ भूर्भुवः स्वः स्वधायै नमः स्वधां आवाहयामि स्थापयामि ॥
स्वधे इहागच्छेह तिष्ठ ॥

१०. स्वाहा –

हविर्गृहीत्वा सततं देवेभ्यो या प्रपच्छति ।
वह्निप्रिया तु स्वाहा समगच्छतु मेऽध्वरे ॥
ॐ स्वाहा यज्ञं मनसः स्वाहोरोरंत रिक्षात्स्वाहा ।
द्यावा पृथिवी भ्या स्वाहाव्वाता दारभे स्वाहा ॥
ॐ भूर्भुवः स्वः स्वाहायै नमः स्वाहां आवाहयामि स्थापयामि ॥

११. मातर –

भूतग्राममिमं कृत्स्नं भया प्रीत्यादितं पुरा ।
त्रैलोक्य पूजितां देवीं मातरं चाह्वयाम्यहम् ॥
ॐ आपोऽअस्मान्मातरः शुंधयंतु घृतेननोघृतप्वः,
पुनंतु । विश्व ँ हिरिप्रम्प्रवहंति देवीरूदिदाभ्यः
शुचिरापूतऽएमिदिक्षांत पसोस्तनूर सितान्त्वा

शिवा शग्माम्परि दधे भद्रं वर्णेपुष्यन् ।
ॐ भूर्भुवः स्वः मातृभ्यो नमः मातृः आवाहयामि स्थापयामि ॥

१२. लोकमातर –

आवाहयेल्लोकमातृ जगत्पालन संस्थिता ।
शक्राद्यैर्वेदिता देवी स्तोत्र पाठाभिचारकैः ॥
ॐ स्वाहा यज्ञं वरुणः सुक्षमो भेषजं करत् ।
अतिच्छंदा ऽ इन्द्रियं बृह, दृष भोगौर्नव्वयोदधुः ॥
ॐ भूर्भुवः स्वः लोकमातृभ्यो नमः लोक मातृः आवाहयामि स्थापयामि ॥

१३. धृतिः –

मनस्तुष्टिकरीं देवीं लोकानुग्रहकारिणीम् ।
सर्वकाम समृद्धयर्थ धृतिमावाहयाम्यहम् ॥
यत्प्रज्ञानमुत चेतो धृतिश्चयज्ज्योति रंतरमृत प्रजासु ।
यस्मान्नऽऋते किंचन कर्मक्रियतेतन्मे मनः शिव संकल्प मस्तु ॥
ॐ भूर्भुवः स्वः धृत्यै नमः धृतिमावाहयामि स्थापयामि ॥

१४. पुष्टि –

प्रणतानां हि लोकेऽस्मिन्पुत्र पुष्टि सुखप्रदाम् ।
भक्तेभ्यश्चापि वरदां पुष्टिमावाहयाम्यहम् ॥
ॐ रयिश्चमे रायश्चमे पुष्टं च मे पुष्टिश्चमेव्विभुच
मे प्रभुच मे । पूर्णं च मे पूर्णतरंच मे कुयवंच-
मेऽक्षितंचमेऽन्नंचमेऽक्षुच्चमेयज्ञेन कल्पन्ताम् ॥
ॐ भूर्भुवः स्वः पुष्ट्यै नमः पुष्टिं आवाहयामि स्थापयामि ॥

१५. तुष्टि –

आवाहयामि तां तुष्टिं सर्वलोक सुखप्रदाम् ।
संतोषभावनां देवीं रक्षणीयेऽध्वरे मम ॥
त्वष्टातुरीपो ऽ अद्भुत ऽ इन्द्राग्नी पुष्टि वर्द्धना ।
द्विपदाच्छंद ऽ इन्द्रियमुक्षागौर्नव्वयोदधुः ॥
ॐ भूर्भुवः स्वः तुष्ट्यै नमः तुष्टिं आवाहयामि स्थापयामि ॥

१६. आत्मनः कुलदेवता –

त्वमात्मा देहिनां देवि सर्वकामफलप्रदा ।
वंशरक्षणकर्त्री च आगच्छागच्छ मेऽध्वरे ॥
प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा ।
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥
ॐ भूर्भुवः स्वः आत्मकुल देवतायै नमः
आत्मकुलदेवतां आवाहयामि स्थापयामि ॥
एवं प्रत्येकमावाहन स्थापने कुर्यात् ॥

प्रतिष्ठा –

ॐ मनोजूति र्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं
तनोत्वरिष्टं यज्ञ ँ् समिमं दधातु ।
विश्वे देवास इहमादयन्तामो३म्प्रतिष्ठ ॥
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति कश्चन ॥
गणेश गौर्यादि ! सु प्रतिष्ठिते वरदे भवेताम् ।
प्रतिष्ठा पूर्वकम् आसनार्थे अक्षतान् समर्पयामि ॥
ॐ गणेश गौर्यादिकाभ्यां नमः (आसन के लिये अक्षत समर्पित करे ।)
ॐ गणेश सहित गौर्यादिषोडश मातृकाभ्यो नमः ।

विशेष – १. मातृकाओं को यज्ञोपवीत न चढ़ाये ।
२. नैवेद्य के साथ–साथ घृत और गुड भी नैवेद्य लगाये ।
३. विशेष अर्घ्य न दे ।

फल का अर्पण – नारियल आदिफल अञ्जलि में लेकर प्रार्थना करे –

ॐ आयुरारोग्यमैश्वर्य ददध्वं मातरो मम ।
निर्विघ्नं सर्वकार्येषु कुरुध्वंस गणाधिपाः ॥

इस प्रकार प्रार्थना करने के बाद नारियल आदि फल चढाकर हाथ जोडकर बोले –

"गेहेवृद्धिशतानि भवन्तु, उत्तरे कर्मण्यविघ्नमस्तु ।"

इसके बाद –

अनया पूजया गणेशसहित गौर्यादिषोडशमातरः प्रीयन्ताम् न मम ।
इस वाक्य का उच्चारण कर मण्डलपर अक्षत छोड़कर नमस्कार करे ।
गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोक मातरः ॥
धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुल देवता ।
गणेशेनाधिका ह्येता वृद्धो पूज्याश्च षोडश ॥
ततः श्री फलोपरि पुष्पाक्षतं निधाय श्री फलं देवताभिमुखं कृत्वा –
पत्रं पुष्पं फलंतोयंरत्नानि विविधानि च ।
गृहाणाघर्य मयादत्तं देहि में वांछितं फलम् ॥
रूपं देहि जयं देहि भाग्यं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥
फलेन फलितं सर्वे त्रैलोक्यं सचराचरम् ।
फलस्यार्घ प्रदानेन पूर्णाः सन्तु मनोरथाः ॥
श्री फलेन एषवोऽर्घः इति संप्रार्थ्य श्रीफलं स्वाभिमुखं
कृत्वा समर्पयेत् । ततः पुष्पाक्षतादीन्गृहीत्वा–
ॐ आयंङ्गो पृश्निरक्रमीद सदन्मातरं पुरः पीतरञ्च प्रयन्त्स्वः ॥१ ॥
वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
अविघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥२ ॥
इति स गणेश गौर्यादिस्थापित मातृभ्यो नमः

मंत्र पुष्पांजलि समर्पयामि ॥

• • •

सप्तघृतमातृका–पूजनम्

आग्नेय कोण में किसी वेदी अथवा काष्ठ पीठ (पाटा) पर प्रादेश मात्र स्थान में पहले रोली या सिन्दूर से स्वस्तिक बनाकर "श्री" लिखे इसके नीचे एक बिन्दु और इसके नीचे दो बिन्दु दक्षिण से करके उत्तर की ओर दे। इसी प्रकार सात बिन्दु क्रम से चित्रानुसार बनाना चाहिये।

पूर्व

॥ श्रीः ॥

o

o o

o o o

o o o o

o o o o o

o o o o o o

o o o o o o o

(वसोर्धारा)

इसके बाद नीचे वाले सात बिन्दुओं पर घी या दूध से प्रादेशमात्र सात धाराएँ निम्न मन्त्र से दे।

घृत–धारा करण –

ॐ वसोः पवित्र मसि शतधारं वसोः पवित्र मसि सहस्रधारम्।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥

इसके बाद गुड के द्वारा बिन्दुओं की रेखाओं को उपर्युक्त मन्त्र पढते हुए मिलाये। तद्नन्तर निम्न वाक्यों का उच्चारण करते हुए प्रत्येक मातृकाओं का आवाहन और स्थापन करे।

१. ॐ ऐं ह्रीं श्रीं श्रियै नमः श्रियमावाहयामि स्थापयामि।
२. ॐ ऐं ह्रीं श्रीं लक्ष्म्यै नमः लक्ष्मीमावाहयामि स्थापयामि।
३. ॐ ऐं ह्रीं श्रीं घृत्यै नमः घृतिमावाहयामि स्थापयामि।
४. ॐ ऐं ह्रीं श्रीं मेधायै नमः मेधामावाहयामि स्थापयामि।
५. ॐ ऐं ह्रीं श्रीं पुष्ट्यै नमः पुष्टिमावाहयामि स्थापयामि।
६. ॐ ऐं ह्रीं श्रीं श्रद्धायै नमः श्रद्धामावाहयामि स्थापयामि।
७. ॐ ऐं ह्रीं श्रीं सरस्वत्यै नमः सरस्वतीमावाहयामि स्थापयामि।

प्रतिष्ठा – इस प्रकार आवाहन स्थापन के बाद इस मन्त्र से प्रतिष्ठा करे –

मन्त्र – एतं ते देव सवितु यज्ञं प्राहुर्व्रहस्पतये ब्रह्मणे तेन यज्ञमवतेन यज्ञपतिंतेन मामव। मनोजुर्तिजुष तामाज्यस्य वृहस्पर्ति यज्ञ मिमं तनोत्वरिष्टं यज्ञ ँ समिमंदधातु॥ विश्वे देवा स इह मादयन्तामों प्रतिष्ठ एष वै प्रतिष्ठा नामयज्ञो यत्रैतेन यज्ञेन यजंते – सर्वमेव प्रतिष्ठितं भवति॥

ॐ ऐं ह्रीं श्रीं सरस्वत्यै नमः सरस्वतीमावाहयामि स्थापयामि।

ॐ ऐं ह्रीं श्रीं सप्तघृतमातृकाभ्यो नमः॥

इस मन्त्र से यथा लब्धोपचार–पूजन करे।

प्रार्थना – तदनन्तर हाथ जोडकर निम्नमन्त्र पढ़कर प्रार्थना करे।

ॐ यदङ्गत्वेन भो देव्याः पूजिता विधिमार्गतः।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन कृतद्भवम्॥
अनया पूजया वसोर्धारादेवताः प्रीयन्ताम् न मम॥

ऐसा उच्चारण कर मण्डल पर अक्षत छोड़े॥

पूजक अञ्जलि में पुष्प ग्रहण करे तथा ब्राह्मण आंयुष्य मन्त्र पाठ करे।

• • •

नवग्रह मण्डल–पूजन

ग्रहों की स्थापना के लिये ईशान कोण में निम्न चित्रानुसार चौकोर मण्डल बनाये। इसप्रकार नौ कोष्ठक बन जायेंगे। बीचवाले कोष्ठ में मसूर से सूर्य, अग्निकोण में चन्द्र चावल से, दक्षिण में मंगल मसूर से, ईशानकोण में बुध मूंग से, उत्तर में बृहस्पति चने की दाल से, पूर्व में शुक्र चावल से, पश्चिम में शनि उड़द से, नैऋत्य कोण में राहु काले तिल से, और वायव्य कोण में केतु काले तिल से इस प्रकार मण्डल बनाकर स्थापना करे।

नवग्रह मण्डल

पूर्व

उत्तर (बायें) — दक्षिण (दायें)

बुध	शुक्र	चन्द्र
गुरु	सूर्य	भौम
केतु	शनि	राहु

पश्चिम

१. सूर्य (मध्य में गोलाकार लाल)

सूर्य आवाहन (लाल अक्षत पुष्प लेकर)

ॐ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यंच ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
जपाकुसुम संकाशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं सूर्यमावाहयाम्यहम् ॥
ऐं ह्रीं श्रीं कलिङ्गदेशोद्भव काश्यप गोत्र रक्तवर्ण भो सूर्य !
इहागच्छ, इहतिष्ठ ॐ सूर्याय नमः श्री सूर्यमावाहयामि,
स्थापयामि पूजयामि ॥ *(पुष्प अक्षत मण्डल पर चढाये ।)*

२. चन्द्र (अग्निकोण में अर्ध चन्द्र श्वेत)

चन्द्रमा आवाहन (श्वेत अक्षत-पुष्प से)

ॐ इमं देवा असपत्न ँ सुवध्वं महते क्षत्राय
महते ज्येष्ठयाय महते जान राज्यायेन्द्रस्येन्द्रियाय ।
इमममुष्य पुत्रम मुष्यै पुत्रमस्यै विशएषवोऽमी
राजा सोमोऽस्माकं ब्राह्मणाना ँ राजा ।
दधिशङ्खतुषारावं क्षीरोदार्णव सम्भवम् ।
ज्योत्स्नापतिं निशानाथं सोममावाहयाम्यहम ॥
ॐ ऐं ह्रीं श्रीं यमुनातीरोद्भव आत्रेयगोत्र शुक्ल वर्ण
भो सोम ! इहागच्छ इहतिष्ठ ॐ सोमाय नमः
सोममावाहयामि, स्थापयामि पूजयामि ॥ *(अक्षत पुष्प चढाये)*

३. मंगल – (दक्षिण में त्रिकोण लाल मसूर से बने मण्डल)

मङ्गल आवाहन – (लाल फूल और अक्षत लेकर ।)

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपा ँ रेता ँ सि जिन्वति ॥
धरणी गर्भ संभूतं विद्युत्तेजस्सम प्रभम् ।
कुमारं शक्तिहस्तं च भौममावाहयाम्यहम ॥
ऐं ह्रीं श्रीं अवन्ति देशोद्भव भारद्वाज गोत्र रक्तवर्ण

भो भौम ! इहागच्छ, इहतिष्ठ ॐ भौमाय नमः,
भौममावाहयामि, स्थापयामि पूजयामि ॥

४. बुध – (ईशान कोण में हराधनुष मूंग से बना मण्डल)

बुध आवाहन – (पीले हरे अक्षत पुष्प लेकर।)

ॐ उद्‌बुध्यस्वाग्ने प्रति जागृहित्वमिष्टापूर्ते ँ सृजेथामयं च।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥
प्रियङ्गुकलिका भासं रूपेणाप्रतिमं बुधम्।
सौम्यं सौम्य गुणोपेतं बुधमावाहयाम्यहम् ॥
ऐं ह्रीं श्रीं मगध देशोद्भव आत्रेयगोत्र पीतवर्ण
भोबुध ! इहागच्छ इहतिष्ठ ॐ बुधाय नमः,
बुधमावाहयामि स्थापयामि पूजयामि ॥

(मूंग हरा धनुष बना मण्डल पर अक्षत पुष्प चढाये।)

५. बृहस्पति – (उत्तर में पीला अष्टदल)

बृहस्पति आवाहन् (पीले अक्षत-पुष्प से)

ॐ बृहस्पते अति यदर्यो अर्हाद् द्युमद्वि भाति क्रतुमज्जनेषु।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतयेत्वा ॥
देवानां च मुनीनां च गुरुं काञ्चनसंनिभम्।
वन्द्य भूतं त्रिलोकानां गुरुमावाहयाम्यहम् ॥
ऐं ह्रीं श्रीं सिन्धु देशोद्भव अङ्गिरसगोत्र पीतवर्ण
भो गुरो ! इहागच्छ, इहतिष्ठ ॐ बृहस्पतये नमः
बृहस्पतिमावाहयामि, स्थापयामि, पूजयामि ॥

६. शुक्र – (पूर्व में श्वेत – चतुष्कोण)

शुक्र आवाहन – (श्वेत अक्षत पुष्प से)

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः।
ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रमन्ध स

इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥
हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्र प्रवक्तारं शुक्रमावाहयाम्यहम् ॥
ऐं ह्रीं श्रीं भोजकट देशोद्भव भार्गव गोत्र शुक्लवर्ण
भो शुक्र ! इहागच्छ इहतिष्ठ ॐ शुक्रमावाहयामि
स्थापयामि पूजयामि ॥ *(श्वेत अक्षत मण्डल पर छोड़े ।)*

७. शनि – (पश्चिम में काला मनुष्य)

शनि आवाहन (काले अक्षत-पुष्प से)

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शं योरभि स्त्रवन्तु नः ॥
नीलाम्बुजसमाभासं रवि पुत्रं यमाग्रजम् ।
छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम् ॥
ऐं ह्रीं श्रीं सौराष्ट्र देशोद्भव काश्यप गोत्र कृष्णवर्ण
भो शनैश्चर ! इहागच्छ इहतिष्ठ ॐ शनैश्चराय नमः
शनैश्चरमावाहयामि, स्थापयामि पूजयामि ॥ *(मण्डल पर अक्षत छोड़े ।)*

८. राहु – (नैऋत्य कोणे, काला मकर)

राहु आवाहन – (काले अक्षत-पुष्प से)

ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥
अर्धकायं महावीर्य चन्द्रादित्य विमर्दनम् ।
सिंहिका गर्भ सम्भूतं राहुमावाहयाम्यहम् ॥
ऐं ह्रीं श्रीं राठिन पुरोद्भव पैठीन सगोत्र कृष्णवर्ण
भो राहो ! इहागच्छ इहतिष्ठ ॐ राहवे नमः
राहुमावाहयामि, स्थापयामि पूजयामि ॥ *(अक्षत छोड़े)*

९. **केतु – (वायव्य कोण में, कष्ण खड्ग)**

केतु आवाहन – (धूमिल अक्षत पुष्प लेकर)

ॐ केतुं कृण्वन्न केतवे पेशो मर्या अपेश से ।
समुषद्भिरजायथाः ॥
पलाशधूम्रसङ्काशं तारका ग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं केतुमावाहयाम्यहम् ॥
ऐं ह्रीं श्रीं अन्तर्वेदिसमुद्भव जैमिनिगोत्र धूम्रवर्ण
भो केतो ! इहागच्छ, इहतिष्ठ ॐ केतवे नमः
केतुमावाहयामि, स्थापयामि पूजयामि ॥ *(अक्षत छोड़े)*

नवग्रह–मण्डल की प्रतिष्ठा – आवाहन और स्थापन के बाद हाथ में अक्षत् लेकर – निम्न मन्त्र पढ़कर अक्षत छोड़े । नवग्रह मण्डलों पर ।

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं
तनोत्वरिष्टं यज्ञ ँ समिमं दधातु ॥ विश्वे देवास
इह मादयन्तामो ३ म्प्रतिष्ठ ॥
ॐ आवाहित सूर्यादि नवग्रहेभ्यो देवेभ्यो नमः ॥

पूजन करने के पश्चात् हाथ जोडकर निम्न प्रार्थना करे ।

प्रार्थना

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमि सुतो बुधश्च ।
गुरुश्च शुक्रः शनि राहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥
सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः ।
सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनि ॥
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं ।
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ॥

निम्न वाक्य का उच्चारण करते हुए नवग्रह मण्डल पर अक्षत छोड़ दे और नमस्कार करे ॥

अनया पूजया सूर्यादि नवग्रहाः प्रीयन्तां न मम ॥

अधिदेवतास्थापनम्

ईश्वर सूर्यदक्षिणपार्श्वे – मण्डल पर अक्षत पुष्प छोड़े ।

ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टि वर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मा मृतात ॥
ॐ भूर्भुवः स्वः ईश्वर इहागच्छेहतिष्ठ ॐ ईश्वराय नमः
ईश्वरमावाहयामि स्थापयामि पूजयामि ॥

उमा सोमदक्षिणपार्श्वे – मण्डल पर अक्षत पुष्प छोड़े

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहो रात्रे पार्श्वे
नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥
ॐ भूर्भुवः स्वः उमे इहागच्छेहतिष्ठ उमायै नमः
उमामावाहयामि स्थापयामि पूजयामि ॥

स्कन्द भौमदक्षिणपार्श्वे – मंगल ग्रह के दक्षिण स्थित मण्डल अधिदेव स्कन्द पर अक्षत पुष्प छोड़े ।

ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यम्महि जातन्तेऽर्वन् ॥
ॐ भूर्भुवः स्वः स्कन्द इहागच्छेहतिष्ठ स्कन्दाय नमः
स्कन्दमावाहयामि स्थापयामि पूजयामि ॥

विष्णु बुध दक्षिणपार्श्वे – बुध के अधिदेव विष्णु मण्डल पर अक्षत पुष्प अर्पण करे ।

ॐ विष्णोररराटमसि विष्णोः श्नपत्रेस्थो विष्णोः
स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवेत्वा ॥
ॐ भूर्भुवः स्वः विष्णोइहागच्छेहतिष्ठ विष्णवे नमः
विष्णुमावाहयामि स्थापयामि पूजयामि ॥

ब्रह्मा गुरुर्दक्षिणपार्श्वे – गुरु के दक्षिण ब्रह्मण अधिदेव मण्डल पर अक्षत पुष्प छोड़े।

ॐ आब्रह्मणब्राह्मणो ब्रह्मवर्चसी जायतामा
राष्ट्रे राजन्यः शूरऽइषव्योति व्याधी महारथो।
जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः
पुरन्धिर्योषा जिष्णु रथेष्ठाः।
सभेयो युवास्याः यजमानस्य वीरो जायतान्नि
काम॒े निकामे नः पर्जन्यो वर्षतु फलवत्यो न
ऽ ओषधयः पच्यन्तां योग क्षेमो नः कल्पताम्।
ॐ भूर्भुवः स्वः ब्रह्मणे नमः
ब्रह्माणमावाहयामि स्थापयामि पूजयामि॥

इन्द्र शुक्रदक्षिणपार्श्वे – (शुक्र के दक्षिण स्थित इन्द्र अधिदेव मण्डल पर अक्षत पुष्प अर्पण करे।)

ॐ सजोषाऽइन्द्र सगणो मरुद्भिः सोमम्पिब वृत्रहा शूरविद्वान।
जहि शत्रूंरपमृधोनुदस्वाथा भयङ्कृणुहि। विश्वतो नमः।
ॐ भूर्भुवः स्वः इहागच्छेहतिष्ठ इन्द्राय नमः
इन्द्रमावाहयामि स्थापयामि पूजयामि॥

यम शनिर्दक्षिणपार्श्वे – (शनि के दक्षिण स्थित अधिदेव यम मण्डल पर अक्षत पुष्प अर्पण करे)

यमाय त्वांगिरस्वते पितृमते स्वाहा।
स्वाहा धर्माय स्वाहा धर्म्मः पित्रे॥
ॐ भूर्भुवः स्वः यम इहागच्छेहतिष्ठ यमाय नमः
यममावाहयामि स्थापयामि पूजयामि॥

काल राहुर्दक्षिणपार्श्वे – (राहु के दक्षिण स्थित अधिदेव काल मण्डलपर अक्षत पुष्प छोड़े)

ॐ कार्षिरसि समुद्रस्य त्वाक्षित्याऽउन्नयामि।
समापोऽअद्भिरग्मत समोषधी। भिरोष धीः॥

ॐ भूभुर्वः स्वः काल इहागच्छेहतिष्ठ कालाय नमः
कालमावाहयामि स्थापयामि पूजयामि ॥

चित्रगुप्त केतु दक्षिण पार्श्वे – (केतु के दक्षिण स्थित अधिदेव चित्र गुप्त मंडल पर अक्षत अर्पण करे ।)

ॐ चित्रावसो स्वस्ति ते पारमशीय ॥
ॐ भूर्भुव स्वः चित्र गुप्त इहागच्छेहतिष्ठ ॐ चित्रगुप्ताय नमः
चित्रगुप्तमावाहयामि स्थापयामि पूजयामि ॥

प्रत्यधि देवता स्थापनम्

सूर्यस्य वामपार्श्वे – (सूर्य के वाम स्थित प्रत्यधि देव स्थित अग्नि मण्डल पर पुष्प अक्षत अर्पण करे ।)

ॐ अग्निं दूतम्पुरोदधे हव्य वाहमुपब्रुवे ।
देवां२ऽ आसादयादिह ॥
ॐ भूर्भुवः स्वः अग्निदेव इहागच्छेहतिष्ठि ॐ अग्नेय नमः
अग्नि-मावाहयामि स्थापयामि पूजयामि ॥

सोमवामपार्श्वे – चन्द्र के वाम स्थित प्रत्यधिदेव आप मण्डल पर पुष्प अक्षत अर्पण करे ।)

ॐ आपोहिष्ठा मयो भुवस्तानऽऊर्जेदधातन महेरणाय चक्षसे ॥
ॐ भूर्भुवः स्वः आपः इहागच्छेह तिष्ठ
आप मावाहयामि स्थापयामि पूजयामि ॥

भौम वाम पार्श्वे – मंगल के वामस्थित प्रत्यधि देव स्थित पृथिवी मण्डल पर अक्षत पुष्प अर्पण करे ।

ॐ स्योना पृथिविनो भवा नृक्षरानिवेशनी यच्छानः शर्म्मस प्रथा ॥
ॐ भूर्भुवः स्वः पृथिवि इहागच्छेह तिष्ठ ॐ पृथिव्यै नमः
पृथिवीमावाहयामि स्थापयामि पूजयामि ॥

बुध वामपार्श्वे – बुध वामभाग स्थित प्रत्यधि देव विष्णु मंडलपर अक्षत पुष्प अर्पण करे।

ॐ इदंम्बिष्णुर्विचक्र में त्रेधानिदधे पदम् समूढमस्ययपाद सुरे स्वाहा ॥
ॐ भूर्भुवः स्वः विष्णो इहागच्छेह तिष्ठ ॐ विष्णवे नमः
विष्णुमावाहयामि स्थापयामि पूजयामि ॥

गुरुवामपार्श्वे – गुरु वामभाग स्थित प्रत्यधिदेव इन्द्र मण्डल पर अक्षत पुष्प अर्पण करे।

ॐ त्रातारमिन्द्रमवितारमिन्द्र हवे हवे सुवह शूरमिन्द्रम्।
ह्वयामि शक्रम्पुरुहूतमिन्द्र स्वस्तिनो मघवाधात्विन्द्रः ॥
ॐ भूर्भुवः स्वः इन्द्र इहागच्छेह तिष्ठ ॐ इन्द्राय नमः
इन्द्रमावाहयामि स्थापयामि पूजयामि ॥

शुक्रवामपार्श्वे – शुक्र वाम भागस्थित प्रत्यधिदेव इन्द्राणी मण्डल पंर अक्षत पुष्प अर्पण करे।

ॐ आदित्यैरास्नासीन्द्राण्या ऽ उष्णीषः पूषासि धर्म्माय दीष्व ॥
ॐ भुर्भुवः स्वः इन्द्राणि इहागच्छेह तिष्ठ ॐ इन्द्राण्यै नमः
इन्द्राणीमावाहयामि स्थापयामि पूजयामि ॥

शनिवाम पार्श्वे – शनि वाम भाग स्थित प्रत्यधिदेव प्रजापति मण्डल पर अक्षत पुष्प अर्पण करें।

ॐ प्रजापते न त्वदेतान्यन्यो विश्वारूपाणि परिताबभूव।
यत्कामास्तै जुहुमस्तन्नोऽअस्तुवय ँ स्याम पतयो र यीणाम् ॥
ॐ भूर्भुवः स्वः प्रजापते इहागच्छेह तिष्ठ ॐ प्रजापतये नमः
प्रजापतिम् आवाहयामि स्थापयामि पूजयामि ॥

राहुवाम पार्श्वे – राहु के वाम भाग स्थित प्रत्यधिदेव सर्प मण्डल पर अक्षत पुष्प अर्पण करे।

ॐ नमोस्तु सर्पेभ्यो येके च पृथिवीमनु।
ये अन्तरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः ॥

ॐ भूर्भुवः स्वः सर्पा इहागच्छेहतिष्ठ ॐ सर्पेभ्यो नमः
ॐ सर्पान् आवाहयामि स्थापयामि पूजयामि ॥

केतुवाम पार्श्वे — केतु वाम भाग स्थित प्रत्यधिदेव ब्रह्मा के मण्डल पर अक्षत पुष्प अर्पण करे ।

ॐ ब्रह्मयज्ञानं प्रथमम्पुरस्ताद्वि सीमतः सुरुचोवेनऽआवः ।
सबुन्ध्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च व्विवः ।
ॐ भूर्भुव स्वः ब्रह्मन् इहगच्छेहतिष्ठ ॐ ब्रह्मणे नमः ।
ब्रह्माणमावाहयामि स्थापयामि पूजयामि ॥

दशदिक्पाल पूजनम्

बायें हाथ में अक्षत लेकर दाहिने हाथ से प्रत्येक मंत्र से अक्षत छोड़े ॥

१. **इन्द्र** *(पूर्व में)* —

ॐ त्रातारमिन्द्रमवितारमिन्द्र हवे हवे सुहव शूरमिन्द्रम ।
ह्वयामि शक्रन्पुरुहूतमिन्द्र स्वस्ति नो मघवा धात्विन्द्रः ॥
इन्द्राय नमः इन्द्रं आवाहयामि स्थापयामि ॥

२. **अग्नि** — *(अग्नि कोण में)*

ॐ अग्नि दूतं पुरोऽदधे हव्यवाहमुपब्रु वे देवां देवां आसादयादिह ॥
अग्नये नमः अग्निं आवाहयामि स्थापयामि ॥

३. **यम** — *(दक्षिण में)*

ॐ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्य ने व्रतेन ।
असि सोमेन समय विपृक् आहुस्ते त्रीणि द्वि बन्धनानि ॥
यमाय नमः यमाय आवाहयामि स्थापयामि ॥

४. **नैर्ऋति** — (नैर्ऋत्य कोण में)

ॐ असुन्वन्तम यजमानमिच्छस्तेन स्येत्या मन्वि हितस्करस्य,
अन्यमस्मदिच्छ सात इत्या नमो देबिनिर्ऋते तुभ्यमस्तु ॥
निर्ऋतये नमः नैर्ऋत्यं आवाहयामि स्थापयामि ॥

५. **वरुण** – *(पश्चिम में)*

ॐ इमं मे वरुण श्रुधि हवमद्या च मृडय । त्वामस्युराचके ॥
वरुणाय नमः ॥ वरुणं आवाहयामि स्थापयामि ॥

६. **वायु** – *(उत्तर कोण में)*

ॐ वायुरग्रेगा यज्ञप्रीः साकं मन्मनसा यज्ञम् ।
शिवोनियुद्भिः शिवाभिः वायवे नमः
वायुं आवाहयामि स्थापयामि ॥

७. **कुबेर** – *(उत्तर में)*

ॐ कुविदङ्ग यवमन्ते । यवं चिद्यथा दान्त्यनु पूर्वंवियूय ।
इहे हैषां कृणुहि भोजनानि ये वर्हिषौ नम उक्तिं यजन्ति ॥
कुबेराय नमः । कुबेरं आवाहयामि स्थापयामि ॥

८. **ईशान** – *(ईशान कोण में)*

ॐ तमीशानञ्जगतस्तस्थु पस्पतिं धियञ्जिन्वमवसे हूमहे वयम् ।
पूषानो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तयै ॥
ईशानाय नमः ईशानं आवाहयामि स्थापयामि ॥

९. **ब्रह्मा** – *(ईशान पूर्व के मध्य में)*

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः
ब्रह्मणे नमः ब्रह्माणं आवाहयामि स्थापयामि ।

१०. **अनन्त** – *(नैर्ऋत्य पश्चिम के मध्य में)*

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवी मनु ।
ये अन्तरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः ॥
अनन्ताय नमः अनन्तं आवाहयामि स्थापयामि
"ॐ इन्द्रादि दश दिक्पालेभ्यो नमः" पूजन के पश्चात् अनया पूजया दशदिक्पाल देवताः प्रीयन्ताम् ॥ *(अक्षत छोड़े ।)*

पञ्चलोकपाल पूजनः

गणपति – ॐ गणानां त्वा गणपति ँ हवामहे
प्रियाणां त्वा प्रियपति ँ हवामहे
निधीनां त्वां निधि पति ँ हवामहे वसो मम ।
आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥
ॐ भूर्भुवः स्वः गणपतये इहागच्छ इहतिष्ठ । गणपतये नमः ॥

देवी – ॐ जातवेदसे सुनवाम सोममरातो यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धु दुरिता त्यग्निः ॥
ॐ भूर्भुवः स्वः दुर्गे इहागच्छ इहतिष्ठ । दुर्गायै नमः ॥

वायु – ॐ आ नो नियुद्भिः शतिनीभिरध्वर ँ सहस्त्रिणी भिरूपयाहि यज्ञं ।
वायो अस्मिन्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥
ॐ भूर्भुवः स्वः वायो इहागच्छ इहतिष्ठ वायवे नमः ॥

आकाश – ॐ घृतं घृतपावानः पिबत वसां ।
वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ॥
दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।
ॐ भूर्भुवः स्वः आकाश इहागच्छ इहतिष्ठ । आकाशाय नमः ॥

अश्विनी – ॐ या वाङ्कशा मधुमत्यश्विना सुनृतावती ।
तया यज्ञम्मिभिक्षताम् ॥
उपयाम गृहीतोऽस्यस्विभ्यान्त्वैषते योनिर्माध्वीभ्यांत्वा ॥
ॐ भूर्भुवः स्वरश्विना इहागच्छतम् इह तिष्ठतम्
अश्विनीभ्यां नमः *(इत्यावाह्य)*
ॐ गणपत्यादिपञ्च लोकपालेभ्यो नमः ॥
अनया पूजया पञ्चलोकपालाः प्रीयन्तां न मम ॥ *(अक्षत छोड़े)*

अथ [१] वास्तुमण्डलदेवतानां पूजनम् एवं होमः ॥

१. ॐ ब्रह्मणे नमः स्वाहा ।
२. ॐ अर्यम्णे नमः स्वाहा ।
३. ॐ विवस्वते नमः स्वाहा ।
४. ॐ मित्राय नमः स्वाहा ।
५. ॐ पृथ्वीधराय नमः स्वाहा ।
६. ॐ सावित्राय नमः स्वाहा ।
७. ॐ सवित्रे नमः स्वाहा ।
८. ॐ विबुधाधिपाय नमः स्वाहा ।
९. ॐ जयाय नमः स्वाहा ।
१०. ॐ राजयक्ष्मणे नमः स्वाहा ।
११. ॐ रुद्राय नमः स्वाहा ।
१२. ॐ अद्भ्यो नमः स्वाहा ।
१३. ॐ आपवत्साय नमः स्वाहा ।
१४. ॐ शिखिने नमः स्वाहा ।
१५. ॐ पर्जन्याय नमः स्वाहा ।
१६. ॐ जयन्ताय नमः स्वाहा ।
१७. ॐ कुलिशाय नमः स्वाहा ।
१८. ॐ सूर्याय नमः स्वाहा ।
१९. ॐ सत्याय नमः स्वाहा ।
२०. ॐ भृशाय नमः स्वाहा ।
२१. ॐ आकाशाय नमः स्वाहा ।
२२. ॐ वायवे नमः स्वाहा ।
२३. ॐ पूष्णे नमः स्वाहा ।
२४. ॐ वितथाय नमः स्वाहा ।
२५. ॐ गृहक्षताय नमः स्वाहा ।
२६. ॐ यमाय नमः स्वाहा ।
२७. ॐ गन्धर्वाय नमः स्वाहा ।
२८. ॐ भृङ्गराजाय नमः स्वाहा ।
२९. ॐ मृगाय नमः स्वाहा ।
३०. ॐ पितृभ्यो नमः स्वाहा ।
३१. ॐ दौवारिकाय नमः स्वाहा ।
३२. ॐ सुग्रीवाय नमः स्वाहा ।
३३. ॐ पुष्पदन्ताय नमः स्वाहा ।
३४. ॐ वरुणाय नमः स्वाहा ।
३५. ॐ असुराय नमः स्वाहा ।
३६. ॐ शोषाय नमः स्वाहा ।
३७. ॐ पापाय नमः स्वाहा ।
३८. ॐ रोगाय नमः स्वाहा ।
३९. ॐ अहये नमः स्वाहा ।
४०. ॐ मुख्याय नमः स्वाहा ।
४१. ॐ भल्लाटाय नमः स्वाहा ।
४२. ॐ सोमाय नमः स्वाहा ।
४३. ॐ सर्पाय नमः स्वाहा ।
४४. ॐ अदित्यै नमः स्वाहा ।

---

१. नाममन्त्राणां मंत्रत्वे गारुडोक्तवचनं प्रमाणम् – यथा प्रणवादिनमोन्तं च चतुर्थ्यन्तं च सत्तम । देवतायाः स्वकं नाम नाममन्त्रः प्रकीर्तितः ।

४५. ॐ दित्यै नमः स्वाहा ।
४६. ॐ चरक्यै नमः स्वाहा ।
४७. ॐ विदार्यै नमः स्वाहा ।
४८. ॐ पूतनायै नमः स्वाहा ।
४९. ॐ पापराक्षस्यै नमः स्वाहा ।
५०. ॐ स्कन्दाय नमः स्वाहा ।
५१ ॐ अर्यम्णे नमः स्वाहा ।
५२. ॐ जृम्भकाय नमः स्वाहा ।
५३. ॐ पिलिपिच्छाय नमः स्वाहा ।
५४. ॐ इन्द्राय नमः स्वाहा ।
५५. ॐ अग्नेय नमः स्वाहा ।
५६. ॐ यमाय नमः स्वाहा ।
५७. ॐ निर्ऋतये नमः स्वाहा ।
५८. ॐ वरुणाय नमः स्वाहा ।
५९. ॐ वायवे नमः स्वाहा ।
६०. ॐ कुबेराय नमः स्वाहा ।
६१. ॐ ईशानाय नमः स्वाहा ।
६२. ॐ ब्रह्मणे नमः स्वाहा ।
६३. ॐ अनन्ताय नमः स्वाहा ।

इति वास्तुमण्डलदेवतानां पूजनम् एवं होमः ॥

अथ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीसमन्वित-गजाननादिचतुःषष्टियोगिनीनां पूजनम् एवं होमः ॥

१. ॐ महाकाल्यै नमः स्वाहा ।
२. ॐ महालक्ष्म्यै नमः स्वाहा ।
३. ॐ महासरस्वत्यै नमः स्वाहा ।
४. ॐ गजाननायै नमः स्वाहा ।
५. ॐ सिंहमुख्यै नमः स्वाहा ।
६. ॐ गृध्रास्यांयै नमः स्वाहा ।
७. ॐ काकतुण्डिकायै नमः स्वाहा ।
८. ॐ उष्ट्रग्रीवायै नमः स्वाहा ।
९. ॐ हयग्रीवायै नमः स्वाहा ।
१०. ॐ वाराह्यै नमः स्वाहा ।
११. ॐ शरभाननायै नमः स्वाहा ।
१२. ॐ उलूकिकायै नमः स्वाहा ।
१३. ॐ शिवारावायै नमः स्वाहा ।
१४. ॐ मयूर्यै नमः स्वाहा ।
१५. ॐ विकटाननायै नमः स्वाहा ।
१६. ॐ अष्टवक्रायै नमः स्वाहा ।
१७. ॐ कोटराक्ष्यै नमः स्वाहा ।
१८. ॐ कुब्जायै नमः स्वाहा ।
१९. ॐ विकटलोचनायै नमः स्वाहा ।
२०. ॐ शुष्कोदर्यै नमः स्वाहा ।
२१. ॐ ललज्जिह्वायै नमः स्वाहा ।
२२. ॐ श्वदंष्ट्रायै नमः स्वाहा ।
२३. ॐ वानराननायै नमः स्वाहा ।
२४. ॐ रुक्षाक्ष्यै नमः स्वाहा ।

२५. ॐ केकराक्ष्यै नमः स्वाहा ।
२६. ॐ बृहत्तुण्डायै नमः स्वाहा ।
२७. ॐ सुराप्रियायै नमः स्वाहा ।
२८. ॐ कपालहस्तायै नमः स्वाहा ।
२९. ॐ रक्ताक्ष्यै नमः स्वाहा ।
३०. ॐ शुक्यै नमः स्वाहा ।
३१. ॐ श्येन्यै नमः स्वाहा ।
३२. ॐ कपोतिकायै नमः स्वाहा ।
३३. ॐ पाशहस्तायै नमः स्वाहा ।
३४. ॐ दण्डहस्तायै नमः स्वाहा ।
३५. ॐ प्रचण्डायै नमः स्वाहा ।
३६. ॐ चण्डविक्रमायै नमः स्वाहा ।
३७. ॐ शिशुघ्न्यै नमः स्वाहा ।
३८. ॐ पापहन्त्र्यै नमः स्वाहा ।
३९. ॐ काल्यै नमः स्वाहा ।
४०. ॐ रुधिरपायिन्यै नमः स्वाहा ।
४१. ॐ वसाधयायै नमः स्वाहा ।
४२. ॐ गर्भभक्षायै नमः स्वाहा ।
४३. ॐ शवहस्तायै नमः स्वाहा ।
४४. ॐ आन्त्रमालिन्यै नमः स्वाहा ।
४५. ॐ स्थूलकेश्यै नमः स्वाहा ।
४६. ॐ बृहत्कुक्ष्यै नमः स्वाहा ।
४७. ॐ सर्पास्यायै नमः स्वाहा ।
४८. ॐ प्रेतवाहनायै नमः स्वाहा ।
४९. ॐ दन्दशूककरायै नमः स्वाहा ।
५०. ॐ क्रौंच्यै नमः स्वाहा ।
५१. ॐ मृगशीर्षायै नमः स्वाहा ।
५२. ॐ वृषाननायै नमः स्वाहा ।
५३. ॐ व्यात्तास्यायै नमः स्वाहा ।
५४. ॐ धूमनिः श्वासायै नमः स्वाहा ।
५५. ॐ व्योमैकचरणोर्ध्वदृशे नमः स्वाहा ।
५६. ॐ तापिन्यै नमः स्वाहा ।
५७. ॐ शोषणीदृष्ट्यै नमः स्वाहा ।
५८. ॐ कोटर्यै नमः स्वाहा ।
५९. ॐ स्थूलनासिकायै नमः स्वाहा ।
६०. ॐ विद्युत्प्रभायै नमः स्वाहा ।
६१. ॐ बलाकास्यायै नमः स्वाहा ।
६२. ॐ मार्जार्यै नमः स्वाहा ।
६३. ॐ कटपूतनायै नमः स्वाहा ।
६४. ॐ अट्टाट्टहासायै नमः स्वाहा ।
६५. ॐ कामाक्ष्यै नमः स्वाहा ।
६६. ॐ मृगाक्ष्यै नमः स्वाहा ।
६७. ॐ मृगलोचनायै नमः स्वाहा ।

इति गजाननादिचतुःषष्टियोगिनीनां पूजनम् एवं होमः ॥

अथैकपञ्चाशत्क्षेत्रपालदेवतानां पूजनम् एवं होमः ॥

१. ॐ क्षेत्रपालाय नमः स्वाहा ।
२. ॐ अजराय नमः स्वाहा ।
३. ॐ व्यापकाय नमः स्वाहा ।
४. ॐ इन्द्रचौराय नमः स्वाहा ।
५. ॐ इन्द्रमूर्तये नमः स्वाहा ।
६. ॐ उक्षाय नमः स्वाहा ।
७. ॐ कूष्माण्डाय नमः स्वाहा ।
८. ॐ वरुणाय नमः स्वाहा ।
९. ॐ बटुकाय नमः स्वाहा ।
१०. ॐ विमुक्ताय नमः स्वाहा ।
११. ॐ लिप्तकाय नमः स्वाहा ।
१२. ॐ लिलाकाय नमः स्वाहा ।
१३. ॐ एकदंष्ट्राय नमः स्वाहा ।
१४. ॐ ऐरावताय नमः स्वाहा ।
१५. ॐ ओषधिघ्नाय नमः स्वाहा ।
१६. ॐ बन्धनाय नमः स्वाहा ।
१७. ॐ दिव्यकाय नमः स्वाहा ।
१८. ॐ कम्बलाय नमः स्वाहा ।
१९. ॐ भीषणाय नमः स्वाहा ।
२०. ॐ गवयाय नमः स्वाहा ।
२१. ॐ घण्टाय नमः स्वाहा ।
२२. ॐ व्यालाय नमः स्वाहा ।
२३. ॐ अणवे नमः स्वाहा ।
२४. ॐ चन्द्रवारुणाय नमः स्वाहा ।
२५. ॐ पटाटोपाय नमः स्वाहा ।
२६. ॐ जटालाय नमः स्वाहा ।
२७. ॐ क्रतवे नमः स्वाहा ।
२८. ॐ घण्टेश्वराय नमः स्वाहा ।
२९. ॐ विटङ्काय नमः स्वाहा ।
३०. ॐ मणिमानाय नमः स्वाहा ।
३१. ॐ गणबन्धवे नमः स्वाहा ।
३२. ॐ डामराय नमः स्वाहा ।
३३. ॐ ढुण्ढिकर्णाय नमः स्वाहा ।
३४. ॐ स्थविराय नमः स्वाहा ।
३५. ॐ दन्तुराय नमः स्वाहा ।
३६. ॐ धनदाय नमः स्वाहा ।
३७. ॐ नागकर्णाय नमः स्वाहा ।
३८. ॐ महाबलाय नमः स्वाहा ।
३९. ॐ फेत्काराय नमः स्वाहा ।
४०. ॐ चीकराय नमः स्वाहा ।
४१. ॐ सिंहाय नमः स्वाहा ।
४२. ॐ मृगाय नमः स्वाहा ।
४३. ॐ यक्षाय नमः स्वाहा ।
४४. ॐ मेघवाहनाय नमः स्वाहा ।
४५. ॐ तीक्ष्णोष्ठाय नमः स्वाहा ।
४६. ॐ अनलाय नमः स्वाहा ।
४७. ॐ शुक्लतुण्डाय नमः स्वाहा ।
४८. ॐ सुधालापाय नमः स्वाहा ।

४९. ॐ बर्बरकाय नमः स्वाहा । ५०. ॐ पवनाय नमः स्वाहा ।
५१. ॐ पावनाय नमः स्वाहा ।

इति क्षेत्रपालदेवतानां पूजनम् एवं होमः ॥

अथ सर्वतोभद्रमण्डलदेवतानां पूजनम् एवं होमः ॥

१. ॐ ब्रह्मणे नमः स्वाहा ।
२. ॐ सोमाय नमः स्वाहा ।
३. ॐ ईशानाय नमः स्वाहा ।
४. ॐ इन्द्राय नमः स्वाहा ।
५. ॐ अग्नये नमः स्वाहा ।
६. ॐ यमाय नमः स्वाहा ।
७. ॐ निर्ऋतये नमः स्वाहा ।
८. ॐ वरुणाय नमः स्वाहा ।
९. ॐ वायवे नमः स्वाहा ।
१०. ॐ अष्टवसुभ्यो नमः स्वाहा ।
११. ॐ एकादशरुद्रेभ्यो नमः स्वाहा ।
१२. ॐ द्वादशादित्येभ्यो नमः स्वाहा ।
१३. ॐ अश्विभ्यां नमः स्वाहा ।
१४. ॐ सपैतृकविश्वेभ्यो देवेभ्यो नमः स्वाहा ।
१५. ॐ सप्तयक्षेभ्यो नमः स्वाहा ।
१६. ॐ भूतनागेभ्यो नमः स्वाहा ।
१७. ॐ गन्धर्वाप्सरोभ्यो नमः स्वाहा ।
१८. ॐ स्कन्दाय नमः स्वाहा ।
१९. ॐ नन्दीश्वराय नमः स्वाहा ।
२०. ॐ शूलमहाकालाभ्यां नमः स्वाहा ।
२१. ॐ दक्षादिसप्तगणेभ्यो नमः स्वाहा ।
२२. ॐ दुर्गायै नमः स्वाहा ।
२३. ॐ विष्णवे नमः स्वाहा ।
२४. ॐ स्वधासहित पितृभ्यो नमः स्वाहा ।
२५. ॐ मृत्युरोगाभ्यां नमः स्वाहा ।
२६. ॐ गणपतये नमः स्वाहा ।
२७. ॐ अभ्द्यो नमः स्वाहा ।
२८. ॐ मरुभ्द्यो नमः स्वाहा ।
२९. ॐ पृशि[illegible] नमः स्वाहा ।
३०. ॐ गङ्गादिन[illegible]भ्यो नमः स्वाहा ।
३१. ॐ सप्तसागरेभ्यो नमः स्वाहा ।
३२. ॐ भेरवे नमः स्वाहा ।
३३. ॐ गदायै नमः स्वाहा ।
३४. ॐ त्रिशूलाय नमः स्वाहा ।
३५. ॐ वज्राय नमः स्वाहा ।
३६. ॐ शक्तये नमः स्वाहा ।
३७. ॐ दण्डाय नमः स्वाहा ।
३८. ॐ खड्गाय नमः स्वाहा ।
३९. ॐ पाशाय नमः स्वाहा ।

४०. ॐ अङ्कुशाय नमः स्वाहा ।
४१. ॐ गौतमाय नमः स्वाहा ।
४२. ॐ भरद्वाजाय नमः स्वाहा ।
४३. ॐ विश्वामित्राय नमः स्वाहा ।
४४. ॐ कश्यपाय नमः स्वाहा ।
४५. ॐ जमदग्नये नमः स्वाहा ।
४६. ॐ वसिष्ठाय नमः स्वाहा ।
४७. ॐ अत्रये नमः स्वाहा ।
४८. ॐ अरुन्धत्यै नमः स्वाहा ।
४९. ॐ ऐन्द्र्यै नमः स्वाहा ।
५०. ॐ कौमार्यै नमः स्वाहा ।
५१. ॐ ब्राह्यै नमः स्वाहा ।
५२. ॐ वाराह्यै नमः स्वाहा ।
५३. ॐ चामुण्डायै नमः स्वाहा ।
५४. ॐ वैष्णव्यै नमः स्वाहा ।
५५. ॐ माहेश्वर्यै नमः स्वाहा ।
५६. ॐ वैनायक्यै नमः स्वाहा ।

इति सर्वतोभद्रमण्डलदेवतानां पूजनम् एवं होमः ॥

मण्ड़प पूजनम्

ॐ [१] अमृतम्भोनिधये नमः

१. ॐ रत्नद्वीपाय नमः
२. ॐ नानावृक्षमहोद्यानाय नमः
३. ॐ कल्पवाटिकायै नमः
४. ॐ सन्तानवाटिकायै नमः
५. ॐ हरिश्चन्दनवाटिकायै नमः
६. ॐ मन्दारवाटिकायै नमः
७. ॐ पारिजातवाािटकायै नमः.
८. ॐ कदम्बवाटिकायै नमः
९. ॐ पुष्परागरत्नप्राकाराय नमः
१०. ॐ पद्मरागरत्नप्राकाराय नमः
११. ॐ गोमेधक रत्नप्राकाराय नमः
१२. ॐ वज्ररत्नप्राकाराय नमः
१३. ॐ वैडूर्यरत्नप्राकाराय नमः
१४. ॐ इन्द्रनीलरत्नप्राकाराय नमः
१५. ॐ मुक्तारत्नप्राकाराय नमः
१६. ॐ मरकतरत्नप्राकाराय नमः
१७. ॐ विद्रुमरत्नप्राकाराय नमः
१८. ॐ माणिक्यमण्डपाय नमः
१९. ॐ सहस्रस्तंभमण्डपाय नमः
२०. ॐ अमृतवापिकायै नमः
२१. ॐ आनन्दवापिकायै नमः
२२. ॐ विमर्शवापिकायै नमः
२३. ॐ बालातपोद्गाराय नमः
२४. ॐ चन्द्रिकोद्गाराय नमः

---

१. – प्रणवेन विहीनं यत्तत्मन्त्रं प्राणहीनकम् । सर्वमन्त्रेषु मन्त्राणां प्राणः प्रणव उच्यते ॥

२५. ॐ महाश्रृङ्गारपरिखायै नमः
२६. ॐ महापद्माटव्यै नमः
२७. ॐ चिन्तामणिमयगृहराजाय नमः
२८. ॐ पूर्वाम्नायमयपूर्वद्वाराय नमः
२९. ॐ दक्षिणाम्नायमयदक्षिणद्वाराय नमः
३०. ॐ पश्चिमाम्नायमयपश्चिमद्वाराय नमः
३१. ॐ उत्तराम्नायमयोत्तरद्वाराय नमः
३२. ॐ रत्नप्रदीपवलयाय नमः
३३. ॐ मणिमयसिंहासनाय नमः
३४. ॐ ब्रह्ममयैकमञ्चपादाय नमः
३५. ॐ विष्णुमयैकमञ्चपादाय नमः
३६. ॐ रुद्रमयैकमञ्चपादाय नमः
३७. ॐ ईश्वरमयैकमञ्चपादाय नमः
३८. ॐ सदाशिवमयैकमञ्चफलकाय नमः
३९. ॐ हंसतूलिकातल्पाय नमः
४०. ॐ हंसतूलिकामहोपधानाय नमः
४१. ॐ कौसुम्भास्तरणाय नमः
४२. ॐ महावितानकाय नमः
४३. ॐ महामायायवनिकायै नमः
४४. तत्र नानारत्नखचितं मुक्ताद्यलंकृतं सिंहासनं स्मरेत् ।

ततः पूर्वद्वारे – ॐ गं गणपतये नमः । ॐ क्षं क्षेत्रपालाय नमः । दक्षिणद्वारे – ॐ श्रीं लक्ष्म्यै नमः । ॐ ऐं सरस्वत्यै नमः । पश्चिमद्वारे – ॐ वं वटुकाय नमः । ॐ यं यमुनायै नमः । उत्तरद्वारे – ॐ अस्त्राय फट् – इति पूर्वादिदिक्षु द्वारेषु देवान् आवाह्य गन्धाक्षतपुष्पैः पूजयेत् । अशक्तौ तु – ॐ द्वारदेवताभ्यो नमः – इति मन्त्रेण पूजयेत् ।

अथ विनियोग :–

'ॐ श्रीम्' इति बीजाभ्यां तीर्थजलेन त्रिवारं करशुद्धिं कुर्यात् ।

ततः – हिरण्यवर्णामिति पञ्चदशर्चस्य सूक्तस्य, श्रीआनन्द-कर्दमचिल्कीदेन्दिरा सुता महर्षयः, श्रीदेवता आद्यास्त्रिस्त्रोनुष्टुभः, पञ्चमीषष्ठ्यौ त्रिष्टुभौ ततोऽष्टानुष्टुभः, द्वादशी निचृदनुष्टुप् त्रयोदशीचतुर्दश्यावनुष्टुभौ, अन्त्या आस्तारपङ्क्तिः, न्यासे विनियोगः[1] ।

अथ ऋष्यादिन्यासः –

ॐ आनन्दकर्दमचिक्लीतेन्दिरा सुत ऋषिभ्यो नमः शिरसि ।

---

१. प्रातःकालेऽथवा पूजासमये होमकर्मणि । जपकाले समस्ते वा विनियोगः पृथक् पृथक् ॥

ॐ अनुवादिछन्दोभ्यो नमः — मुखे। ॐ श्रीदेवतायै नमः — हृदये। ॐ हिरण्यवर्णामिति बीजाय नमः — गुह्ये। ॐ कांसोस्मितामिति शक्तये नमः — पादयोः। ॐ बिन्दुः कीलकाय नमः — नाभौ। ॐ ममाभीष्टलक्ष्मीप्राप्त्यर्थे न्यासे विनियोगाय नमः — सर्वाङ्गे।

अथ षडङ्गकरन्यासः –

ॐ हिरण्यवर्णाम् — अङ्गुष्ठयोः। ॐ हरिणीम् — तर्जन्योः। ॐ सुवर्णरजतस्रजाम्-मध्यमयोः। ॐ चन्द्रां हिरण्मयीम् — अनामिकयोः। ॐ लक्ष्मीम्-कनिष्ठिकयोः। ॐ जातवेदो म आवाह — करतलकरपृष्ठयोः।

अथ हृदयादिषडङ्गन्यासः –

ॐ हिरण्यवर्णाम्-हृदयाय नमः। ॐ हरिणीम्-शिरसे स्वाहा। ॐ सुवर्णरजतस्रजाम् — शिखायै वषट्। ॐ चन्द्रां हिरण्मयीम् — कवचाय हुम्। ॐ लक्ष्मीम् — नेत्रत्रयाय वौषट्। ॐ जातवेदो म आवाह — अस्त्राय फट्।

अथ षडङ्गकरन्यासः –

ॐ हिरण्यवर्णायै नमः — अङ्गुष्ठाभ्यां नमः। ॐ सुवर्णायै नमः — तर्जनीभ्यां नमः। ॐ रजतस्रजायै नमः — मध्यमाभ्यां नमः। ॐ चन्द्रायै नमः अनामिकाभ्यां नमः। ॐ हिरण्मय्यै नमः — कनिष्ठिकाभ्यां नमः। ॐ लक्ष्म्यै नमः — करतलकरपृष्ठाभ्यां नमः।

अथ हृदयादिषडङ्गन्यासः –

ॐ हिरण[१]मय्यै नमः — हृदयाय नमः। ॐ चन्द्रायै नमः — शिरसे स्वाहा। ॐ रजतस्रजायै नमः — शिखायै वषट्। ॐ हिरण्यस्रजायै नमः — कवचाय हुम्। ॐ हिरण्याक्षायै नमः — नेत्रत्रयाय वौषट्। ॐ हिरण्यवर्णायै नमः — अस्त्राय फट्।

---

१. विद्यार्णवतन्त्रे–हिरण्मयी च चन्द्रा च तृतीया रजतस्रजा। हिरण्याद्या स्रजा त्वन्या हिरण्या च तथापरा। हिरण्यवर्णा चैताभिः कुर्यादङ्गानि षट् क्रमात् ॥

ॐ श्रियै नमः — शिरसि। ॐ लक्ष्म्यै नमः — नेत्रयोः। ॐ वरदायै नमः — कर्णयोः। ॐ विष्णुपत्न्यै नमः — नासिकयोः। ॐ वसुदायै नमः — मुखे। ॐ हिरण्यवर्णायै नमः - गण्डयोः। ॐ स्वर्णमालिन्यै नमः — कण्ठे। ॐ स्रजायै नमः — ओष्ठयोः। ॐ सुवर्णगृहायै नमः — दक्षिणबाहौ। ॐ स्वर्णप्राकारायै नमः — वामबाहौ। ॐ पद्मवासिन्यै नमः — स्तनयोः। ॐ पद्महस्तायै नमः — दक्षिणहस्ते ! ॐ पद्मप्रियायै नमः — वामहस्ते। ॐ मुक्तालङ्कारायै नमः — हृदये। ॐ सूर्यायै नमः — उदरे। ॐ चन्द्रायै नमः — नाभौ। ॐ बिल्वप्रियायै नमः — दक्षिणकरे। ॐ ईश्वर्यै नमः — वामकरे। ॐ भुक्त्यै मुक्त्यै नमः — कुक्षिद्वये। ॐ विभूत्यै वृद्ध्यै नमः कटिद्वये। ॐ समृध्यै नमः गुह्ये। ॐ तुष्ट्यै पुष्ट्यै नमः — उरुद्वये। ॐ गङ्गायै धनेश्वर्यै नमः — जानुद्वये। ॐ शुद्धायै भोगिन्यै नमः — गुल्फद्वये। ॐ भोगदायै धात्र्यै नमः — पादद्वये। ॐ विधात्र्यै नमः - सर्वाङ्गे। उपरिभागे — ॐ साम्राज्यलक्ष्म्यै नमः। पुरतः ॐ सागरजायै नमः। पृष्ठे - ॐ कमलायै नमः। दक्षिणभागे — ॐ द्विजराजसहोदर्यै नमः। वामभागे — ॐ जयप्रदायै नमः। पाताले — ॐ विजयप्रदायै नमः। मध्ये — ॐ सर्वसौभाग्यदायै नमः। 'ॐ भूर्भुवः स्वरोम्' इति दिग्बन्धनम्।

श्री सूक्तन्यासः विनियोग —

हिरण्यवर्णामिति पञ्चदशर्चस्य श्री सूक्तस्य आनन्दकर्दम चिक्लीतेन्दिरासुता ऋषयः आद्यानां तिसृणामनुष्टुपच्छन्द, चतुर्थ्याः प्रस्तारपंक्तिश्छन्दः, पंचमी — षष्ठ्योस्त्रिष्टुप्छन्द, ततोऽष्टानामनुष्टुपछन्द, अन्त्यायाः प्रस्तारपंक्तिश्छन्दः न्यासे पठे (हवने) च विनियोगः।

१. ॐ हिरण्यवर्णाम्० इस मन्त्र से दाहिने हाथ से बाएं हाथ का स्पर्श करे।
२. ॐ तां मऽआवह० इस मन्त्र से बाएं हाथ से दाहिने हाथ का स्पर्श करे।
३. ॐ अश्व पूर्वाम्० इस मन्त्र से बाएं पैर का स्पर्श करे।
४. ॐ कां सोस्मिताम० इस मन्त्र से दाहिने पैर का स्पर्श करे।
५. ॐ चन्द्रां प्रभासाम्० इस मन्त्र से बाएं जंघा का स्पर्श करे।

६. ॐ आदित्य वर्णे॰ इस मन्त्र से दाहिने जंघा का स्पर्श करे।

७. ॐ उपैतु माम्॰ इस मन्त्र से बाएं कटिभाग (कमर) का स्पर्श करे।

८. ॐ क्षुप्तिपासामलाम्॰ इस मन्त्र से दाहिने कटि-प्रदेश का स्पर्श करे।

९. ॐ गंधद्वाराम्॰ इस मन्त्र से नाभि का स्पर्श करे।

१०. ॐ मनसः काममाकूतिम॰ इस मन्त्र से हृदय का स्पर्श करे।

११. ॐ कर्दमेन प्रजाभूता॰ इस मन्त्र से वाम भुजा का स्पर्श करे।

१२. ॐ आपः सृजन्तु॰ इस मन्त्र से दक्षिण भुजा का स्पर्श करे।

१३. ॐ आर्द्रां पुष्करिणीम्॰ इस मन्त्र से कण्ठ का स्पर्श करे।

१४. ॐ आर्द्रां यः करिणीम्॰ इस मन्त्र से मुख का स्पर्श करे।

१५. ॐ तां मऽआवह॰ इस मन्त्र से दोनों नेत्रों का स्पर्श करे।

१६. ॐ यः शुचि प्रयतोभूत्वा॰ इस मन्त्र से सिर का स्पर्श करे।

अथ षडङ्गन्यासः –

१. ॐ कर्दमेन प्रजाभूता॰ इस मन्त्र से हृदय को स्पर्श करे।

२. ॐ आपः सृजन्तु॰ इस मन्त्र से सिर को स्पर्श करे।

३. ॐ आर्द्रां पुष्करिणीम्॰ इस मन्त्र से शिखा को स्पर्श करे।

४. ॐ आर्द्रां यष्करिणीम्॰ इस मन्त्र से दोनों भुजाओं को स्पर्श करे।

५. ॐ तामऽआवह॰ इस मन्त्र से दोनों नेत्रों को स्पर्श करे।

६. ॐ यः शुचि प्रयतो भूत्वा॰ इस मन्त्र से सिर के उपर से हाथ घुमाकर "अस्त्राय फट् कहे। (बायें हाथ की हथेली पर मध्यमा तथा तर्जनी से ताली बजाये। इस प्रकार कर पश्चात् अपने चारों ओर चुटकी बजावे)।

ॐ श्राम् – हृदयाय नमः। ॐ श्रीम् – शिरसे स्वाहा। ॐ श्रूम् – शिखायै वषट्। ॐ श्रैम् – कवचाय हुम्। ॐ श्रौम् – नेत्रत्रयाय वौषट्। ॐ श्रः अस्त्राय फट्।

ॐ ह्राम् – अंगुष्ठाभ्यां नमः। ॐ ह्रीम् – तर्जनीभ्यां नमः। ॐ ह्रूम् – मध्यमाभ्यां नमः। ॐ ह्रैम् – अनामिकाभ्यां नमः। ॐ ह्रौम् – कनिष्ठिकाभ्यां नमः। ॐ ह्रः – करतलकरपृष्ठाभ्यां नमः।

(१) ॐ हिरण्यवर्णाम	भगवत्यै	म[१]हालक्ष्म्यै नमः	शिर[२]सि
(२) ॐ तां म ऽ आवह	"	"	नेत्रयोः
(३) ॐ अश्वपूर्णाम्	"	"	कर्णयोः
(४) ॐ कांसोस्मिताम्	"	"	नासिकयोः
(५) ॐ चन्द्रां प्रभासाम्	"	"	मुखे
(६) ॐ आदित्यवर्णे	"	"	कण्ठे
(७) ॐ उपैतु माम्	"	"	बाह्वोः
(८) ॐ क्षुत्पिपासा	"	"	हृदये
(९) ॐ गन्धद्वाराम्	"	"	नाभौ
(१०) ॐ मनसः कामम्	"	"	गुह्ये
(११) ॐ कर्दमेन प्रजा	"	"	पादयोः
(१२) ॐ आपः सृजन्तु	"	"	ऊर्वोः
(१३) ॐ आर्द्रां पुष्करणीम्	"	"	जान्वोः
(१४) ॐ आर्द्रां यष्करणीम्	"	"	जङ्घयोः
(१५) ॐ तां म आवह.	"	"	पादयोः
(१६) ॐ यः शुचिः प्रयतो	"	"	सर्वाङ्गेषु

(१) ॐ कर्दमेन प्रजा	भगवत्यै	महालक्ष्म्यै नमः	हृदयाय नमः
(२) ॐ आपः सृजन्तु	"	"	शिरसे स्वाहा
(३) ॐ आर्द्रां पुष्करणीम्	"	"	शिखायै वषट्
(४) ॐ आर्द्रां यष्करणीम्	"	"	कवचाय हुम्
(५) ॐ तां म आवह.	"	"	नेत्रत्रयाय वौषट
(६) ॐ यः शुचिः प्रयतो	"	"	अस्त्राय फट्

---

(१) भगवत्यै महालक्ष्म्यै नमः इतिप्रतिमन्त्रान्ते योजयेदिति पृथ्वीधराचार्यभाष्यकारमतम् ।

(२) मस्तकलोचनश्रुतिघ्राणवदनकण्ठबाहुद्वयहृदयनाभिगुह्यपायूरुजानुजङ्घेषु । श्रीसूक्तैकैकर्च 'क्रमशो न्यसेत्' इति सौभाग्यलक्ष्म्युपनिषदि ।

ततः कुशैः श्रीसूक्तप्रतिमन्त्रेण 'मार्जयामि' इत्यध्यारेण सह मार्जनं करणीयम्। एवं समग्रं श्रीसूक्तं पठित्वा अघमर्षणं कृत्वा तज्जलं स्ववामतः प्रक्षिप्योत्थाय ऊर्ध्वबाहुः श्रीसूक्ततेनोपस्थानं कुर्यात्। ततः स्वात्मनि श्रीसूक्तेन महालक्ष्मी संपूजयेदिति संप्रदायः।

ध्यानम् –

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी, गम्भीरावर्तनाभि-स्तनभरनमिताशुभ्रवस्त्रोत्तरीया। लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुंभैर्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता॥

अथ पाद्यादिपात्रस्थापनपूजनम्

पूर्व नवकोष्ठात्मिकां भूमिं संपाद्य पूर्वादितो मध्ये च पाद्यादिपात्राणामुत्तरक्रमेण संस्थाप्य एवं पञ्चपञ्चामृतपात्राणां स्थापनं कृत्वा विदिक्षु सुगन्धिततैलादिसुगन्धितद्रव्याणि निधाय स्थापनक्रमेण नवसु पात्रेषु सद्रव्येषु नवदेवताः पूजयेत् – ॐ विद्यायै नमः। ॐ अविद्यायै नमः। ॐ प्रकृत्यै नमः। ॐ मायायै नमः। ॐ तेजस्विन्यै नमः। ॐ प्रबोधिन्यै नमः। ॐ सत्याय नमः। ॐ रजसे नमः। ॐ तमसे नमः। इति संपूज्य गायत्र्याऽभिमृशेत्।

अथ पूजाकलशार्चनम्[1]

स्ववामभागे पूजाकलशं संस्थाप्य तत्र 'ॐ इमं मे वरुणेति' मन्त्रेण वरुणं संपूज्य गायत्र्या दशवारमभिमन्त्र्य 'ॐ गङ्गे च यमुने चैव गोदावरि सरस्वती। नर्मदे सिन्धुकावेरि जलेऽस्मिन्सन्निधिं कुरु॥ सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः। आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥ इति तीर्थान्यावाह्य 'ॐ कलशस्य मुखे विष्णु' इति विष्णवादीनामावाहयेत्। ॐ विष्णवे नमः। ॐ रुद्राय नमः।

---

(१) पञ्चरात्रे – सौवर्णं कलशं रम्यं रौप्यं ताम्रमथापि वा। निर्दोषं मृण्मयं वापि चन्दनेन विलेपितम्॥ गन्धपुष्पाक्षताकीर्णं कुशदूर्वाङ्कुरार्चितम्। सितसूत्रावृतं कण्ठे नववस्त्रयुगावृतम्। कन्याकर्तितसूत्रेण त्रिगुणेन च कर्मणा। गुणतत्त्रयात्मकेनैव वेष्टयेदभितः स्वयम्॥

ॐ ब्रह्मणे नमः। ॐ मातृगणेभ्यो नमः। ॐ सागरेभ्यो नमः। ॐ सप्तद्वीपवसुन्धरायै नमः। ॐ ऋग्वेदाय नमः। ॐ यजुर्वेदाय नमः। ॐ सामवेदाय नमः। ॐ अथर्ववेदाय नमः। ॐ वेदांगेभ्यो नमः। ॐ गायत्र्यै नमः। ॐ सावित्र्यै नमः। ॐ शान्त्यै नमः। ॐ सरस्वत्यै नमः। इत्यावाह्य संपूजयेत्।

अथ पीठपूजा

ॐ मण्डूकाय नमः। ॐ कालाग्निरुद्राय नमः। ॐ मूलप्रकृत्यै नमः। ॐ आधारशक्त्यै नमः॥ ॐ कूर्माय नमः। ॐ अनन्ताय नमः। ॐ वाराहाय नमः। ॐ पृथिव्यै नमः। ॐ सुधासमुद्राय नमः। ॐ श्वेतद्वीपाय नमः। ॐ स्वर्णपर्वताय नमः। ॐ नन्दनोद्यानाय नमः। ॐ कल्पवृक्षवनाय नमः। ॐ स्वर्णप्राकाराय नमः। ॐ करुणातोयपरिखायै नमः। ॐ स्वर्णमंडपाय नमः।

पूर्वद्वारे — ॐ द्वारश्रियै नमः। ॐ इन्द्राय नमः। ॐ ब्रह्मणे नमः। ॐ सत्वाय नमः। ॐ ऋग्वेदाय नमः। ॐ आत्मने नमः। ॐ कालतत्वाय नमः। ॐ अम्बिकायै नमः। ॐ इन्द्राण्यै नमः। ॐ वेदमात्रे नमः। ॐ शैलपुत्र्यै नमः। ॐ ब्रह्मचारिण्यै नमः। ॐ चण्डघण्टायै नमः। ॐ स्कन्दमात्रे नमः। ॐ कात्यायिन्यै नमः। ॐ गौर्यै नमः।

दक्षिणद्वारे — ॐ द्वारश्रियै नमः। ॐ यमाय नमः। ॐ शान्त्यै नमः। ॐ सिद्धायै नमः। ॐ क्षमायै नमः। ॐ विष्णवे नमः। ॐ यजुर्वेदाय नमः। ॐ रजसे नमः। ॐ विद्यातत्वाय नमः। ॐ जगन्मात्रे नमः। ॐ मायायै नमः। ॐ शिवायै नमः। ॐ शान्त्यै नमः। ॐ प्रभायै नमः। ॐ ह्रीं कारायै नमः। ॐ क्लीं कारायै नमः। ॐ मायाशक्त्यै नमः। ॐ वीरायै नमः। ॐ अन्तरात्मने नमः। ॐ दण्डधराय नमः।

पश्चिमद्वारे — ॐ द्वारश्रियै नमः। ॐ वरुणाय नमः। ॐ रुद्राय नमः। ॐ सामवेदाय नमः। ॐ तमसे नमः। ॐ आदित्याय नमः। ॐ वारुण्यै नमः। ॐ शंखायुधायै नमः। ॐ हंसवाहिन्यै नमः। ॐ जगज्जीवायै नमः। ॐ जगद्बीजायै नमः। ॐ षोडशकलायै नमः। ॐ पूर्णकलशाय नमः।

ॐ चित्रिण्यै नमः। ॐ चित्रमालायै नमः। ॐ चित्रायै नमः। ॐ चामुण्डायै नमः।

उत्तरद्वारे – ॐ द्वारश्रियै नमः। ॐ कपालधारिण्यै नमः। ॐ भक्तवत्सज्योत्स्नायै नमः। ॐ कल्याण्यै नमः। ॐ शर्वाण्यै नमः। ॐ चन्द्रकलायै नमः। ॐ चन्द्रवदनायै नमः। ॐ विभूत्यै नमः। ॐ परमविभूत्यै नमः। ॐ भस्मधारिण्यै नमः। ॐ पावनायै नमः। ॐ गङ्गायै नमः। ॐ भागीरथ्यै नमः। ॐ गोदावर्यै नमः। ॐ प्रवरायै नमः। ॐ प्रणतायै नमः। ॐ क्रां कारायै नमः। ॐ क्रीं कारायै नमः। ॐ क्रौं कारायै नमः। ॐ सर्वबीजात्मने नमः। ॐ बीजप्रवाहिन्यै नमः।

मध्ये – ॐ रत्नवेदिकायै नमः। ॐ रत्नसिंहासनाय नमः। ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ ऐश्वर्याय नमः। ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। ॐ अवैराग्याय नमः। ॐ अनैश्वराय नमः। ॐ श्वेतच्छत्राय नमः। ॐ चिच्छक्त्यै नमः। ॐ मायाशक्त्यै नमः। ॐ आनन्दकन्दाय नमः। ॐ संविन्नालाय नमः। ॐ प्रकृतिमयपत्रेभ्यो नमः। ॐ विकारमयकेसरेभ्यो नमः। ॐ पञ्चाशद्वर्णबीजाढ्यसर्वेभ्यो नमः। ॐ तत्वरूपायै कर्णिकायै नमः। ॐ अं अर्कमण्डलाय नमः। ॐ मं वह्निमण्डलाय नमः। ॐ सं सोममण्डलाय नमः। ॐ सं सत्वाय नमः। ॐ रं राजसे नमः। ॐ तं तमसे नमः। ॐ आं आत्मने नमः। ॐ अं अन्तरात्मने नमः। ॐ पं परमात्मने नमः। ॐ ह्रीं ज्ञानात्मने नमः। ॐ आत्मतत्वाय नमः। ॐ मायातत्वाय नमः। ॐ विद्यातत्वाय नमः। ॐ कालतत्वाय नमः। ॐ परतत्वाय नमः।

केसरेषु पूर्वादिक्रमेण –

ॐ विभूत्यै नमः। ॐ उन्नत्यै नमः। ॐ कान्त्यै नमः। ॐ हृष्ट्यै नमः। ॐ कीर्त्यै नमः। ॐ सन्नत्यै नमः। ॐ व्युष्ट्यै नमः। ॐ उत्कृष्ट्यै नमः। ॐ मत्यै नमः। ॐ ऋध्यै नमः।

ततः – ॐ श्रीं सर्वशक्तिकमलासनाय नमः। ॐ महालक्ष्मीयोगपीठाय नमः। इति समस्तपीठं सम्पूज्य कर्णिकायां पुष्पाञ्जलिं दद्यात्।

अथाग्न्युत्तारणम् –

देविप्र[१]तिमां सुवर्णादिपात्रे निधाय मधुघृताभ्यामभ्यज्य 'ॐ अश्मन्नूर्जम्' इत्यनुवाकेन श्रीसूक्तेन च दुग्धमिश्रितजलेन केवलदुग्धेन वा अभिषेकं कृत्वा प्रतिमां बहिर्निष्काश्य स्वच्छनवीनपट्टवस्त्रादिना सम्प्रोञ्च्छ् य यन्त्रोपरि विन्यस्य प्राणप्रतिष्ठां कुर्यात् –

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं श्रीमहालक्ष्म्यादिदेवताप्रीत्यर्थं प्रतिष्ठापने विनियोगः।

ॐ ब्रह्मविष्णुमहेश्वरेभ्यो ऋषिभ्यो नमः शिरसि। ॐ ऋग्यजुःसामछन्दोभ्यो नमो मुखे। ॐ प्राणशक्तिदेवतायै नमः – हृदये। ॐ आं बीजाय नमः – गुह्ये। ॐ ह्रीं शक्तये नमः – पादयोः। ॐ क्रों कीलकाय नमः—नाभौ। ॐ प्राणप्रतिष्ठापने विनियोगः – सर्वाङ्गे।

ॐ ह्रांम् – अङ्गुष्ठाभ्यां नमः। ॐ ह्रीम् – तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैंम्-अनामिकाभ्यां नमः। ॐ ह्रौं-कनिष्ठिकाभ्यां नमः। ॐ ह्रः-करतलकरपृष्ठाभ्यां नमः।

ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुम्। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्।

ततः – ध्यायेत् – ध्यायेल्लक्षमीं प्रहसितमुखीं राज्यसिंहासनस्थां मुद्राशक्तिं सकलविनुतां सर्वसंसेव्यमानाम्। अग्नौ पूज्यामखिल जननीं हेमवर्णां हिरण्यां भाग्योपेतां भुवनसुखदां भार्गवीं भूतिधात्रीम्॥ इति ध्यात्वा प्रतिमाया उपरि हस्तं निधाय प्राणप्रतिष्ठाबीजानि पठेत् – ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सः श्रीमहालक्ष्मीदेव्याः प्राणा इह प्राणाः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं

---

(१) तत्रादौ ब्राह्मणद्वारा श्रीसूक्तस्य अष्टौ चत्वारः द्वौ एको वा पाठं कारयित्वा कुलालगृहे गत्त्वा कुलालं वस्त्रादिना संपूज्य निमन्त्रयेत् – ॐ कुलालभाण्डसृष्टिज्ञ चक्रभ्रमणनैपुण। निमन्त्रितोसीन्दराय मूर्तिनिर्माणहेतवे॥ सृष्टिकर्ता यथा ब्रह्मा सावित्री सहितः स्वयम्। तथा त्वं भाण्डकर्तासि पूजितः शुभदो भव॥ ततः कुलालचक्रं संपूज्य प्रार्थयेत् – सुदर्शनं यथा चक्रं विष्णोर्लोकहिताय च। तद्वत्कुलालचक्रस्त्वं पूजितं मे शुभं कुरु॥

सं हं क्षं सः जीव इह स्थितः । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सः सर्वेन्द्रियाणि वाङ्मनः । श्रोत्रत्वकचक्षुर्जिह्वाघ्राणपादपायूपस्था इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । ॐ अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणा क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेतीति कश्च न ॥ ततः प्रणवं षोडशवारं जपेत् ।

ततः – एकाग्रचित्तो भूत्वा दक्षिणहस्ते कमलादिनानापुष्पसमन्वितः पुष्पाहारं गृहीत्वोत्थाय प्रार्थयेत् –

समस्तसंपतत्सुखदां महाश्रियं समस्तसौभाग्यकरीं महाश्रियम् ।
समस्तकल्याणकरी महाश्रियं भजाम्यहं ज्ञानकरी महाश्रियम् ॥१ ॥
समस्तभूतान्तरसंस्थिता त्वं समस्तभूतेश्वरि विश्वरूपे ।
तन्नास्ति यत्वद्व्यतिरिक्तवस्तु त्वतपपादपद्मं प्रणमाम्यहं श्रीः ॥२ ॥
दारिद्र्यदुःखौघतमोपहन्त्री त्वत्पादपद्मं मयि सन्निधत्स्व ।
दीनार्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिञ्च मां श्रीः ॥३ ॥
अम्ब प्रसीद करुणासुधयार्द्रदृष्ट्या मां त्वत्कृपाद्रविणगेहमिमं कुरुष्व ।
आलोकनप्रणयिहृद्गतशोकहन्त्री त्वत्पादपद्मयुगलं प्रणयाम्यहं श्रीः ॥४ ॥
शान्त्यै नमोऽस्तु शरणागतरक्षणायै कान्त्यै नमोऽस्तु कमनीयगुणाश्रयायै ।
शान्त्यै नमोऽस्तु दुरितक्षयकारणायै धात्र्यै नमोऽस्तु धनधान्यसमृद्धिदायै ॥५ ॥
विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यसिद्धिं कुरु मे गृहे श्रीः ।
दयासुपुष्टिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे करे श्रीः ॥६ ॥
न मां त्यजेथाः श्रितकल्पवल्लिसद्भक्तिचिन्तामणिकामधेनो ।
विश्वस्य मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे ॥७ ॥
माता पिता त्वं गुरुसद्गतिः श्रीस्त्वमेवसञ्जीवनहेतुभूता ।
अन्यं न मन्ये जगदेकनाथे त्वमेव सर्व मम देवि सत्यम् ॥८ ॥
अशेषवाग्जाड्यमलापहारिणीं नवं नवं स्पष्टसुवाकप्रदायिनि ।
ममैहि जिह्वाग्रसुरङ्गनर्तकी भव प्रसन्ना वदने च मे श्रीः ॥९ ॥
वागर्थसिद्धिं बहुलोकवश्यं वयः स्थिरत्वं ललनासुभोगम् ।
पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्मजन्मनि ॥१० ॥

समस्तविघ्नौघविनाशकारिणी समस्तविघ्नोद्धरणे विचक्षणा ।
अनन्तसौभाग्यसुखप्रदायिनी हिरण्मये मे वदने प्रसन्ना ॥११ ॥
ततः — यथाद्यु पचारैरर्चयेत् —

अथार्चन प्रकारः

आयाहि वरदे देवि मण्डलोपरि सर्वदा। पूजां गृहाण देवेशि शत्रूणां क्षयकारिणी ॥ पाद्यादिपात्रमिदं तुभ्यं दीयते लोकहेतवे। स्वीकृत्य सुभगे देवि श्रियं देहि रिपून् दह ॥ कृताञ्जलिः सन् प्रार्थयेत — देवेशि भक्तिसुलभे परिवार समन्विते, यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ध्यानम् ।

आवाहनम् :—

इन्द्रादिदेवगणमौलिकिरीटिकोटिरत्नाङ्कुरैः सततरञ्जितपादपीठम् ।
दुःखाभिभूतजनदुर्गतिनाशिनीं त्वामावाहयामि कृपया भव सम्मुखीना ॥
ॐ दुर्गेकात्यायनि देवि शाम्भवि शंकर प्रिये ।
मया भक्त्या कृतां पूजां गृहाण त्वं महेश्वरि ॥
हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोमआवह० ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
श्री महालक्ष्म्यै नमः आवाहनं समर्पयामि इति दद्यात् ॥

आसनम् :—

मुक्ताप्रवालमणिलोहितपद्मरागकान्त्युल्लसद्रुचिररत्नमयं सुरम्यम् ।
राजीवपत्रनयने दयया सुपीठमेनं गृहाण कमले विनिवेदितं मे ॥
ॐ तप्तकाञ्चनवर्णाभं मुक्तामणि विराजितम् ।
अमलं कमलं दिव्यमासनं प्रति गृह्यताम् ॥
तां म आ वह जातवेदो लक्ष्मी मन पगामिनीम् ।

यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निंदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
श्री महा सरस्वत्यै नमः श्री रेतते आसनं नमः ॥

स्वागतं एवं पाद्यं :-

स्वागतं कुशलं प्रच्छे महादेव्यै महेश्वरि ।
सुस्वागतेत्वया भद्रे कृपया भक्त वत्सले ॥
तां म आ वह जातवेदो लक्ष्मीमन पगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
महासरस्वत्यै नमः श्री रेतते स्वागतं नमः ।
सन्तापनोदनपरं बहुभक्तिभावचित्तेन हेमकलशे विहितं पवित्रे ।
त्वत्पादपद्मयुगले विनिवेदितं मे पाद्यं गृहाण जगदीश्वरि लोकवन्द्ये ॥
ॐ गङ्गादितीर्थ सम्भूतं गंध पुष्पाक्षतैर्युतम ॥
पाद्यं ददाम्यहं तुभ्यं नमस्ते कमलालये ॥
अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम् ।
श्रियं देवीमुप ह्वये श्रीर्मा देवी जुषताम् ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥श्री रेतते पाद्यं नमः ।

अर्घ्यं :-

भ्राजिष्णुहाटकविनिर्मितपात्रमध्ये संस्थापितं कुसुमगन्धसुवासितं च।
भक्त्योपनीतमचिरेण सुरभ्यमेवमर्घ्यं गृहाण कृपया पतितस्य देवि॥
अष्टगंध समायुक्तं स्वर्णपात्रे प्रपूरितम्।
अर्घ्यं ददाम्यहं तुभ्यं प्रसीदत्वं सुरेश्वरि॥
कां सोस्मितां हिरण्य प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामि होप ह्वये श्रियम्॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः॥
नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥
लोकमात्रे नमः श्री रेषतेऽर्घ्यः स्वाहा॥

आचमनं :-

आनन्दमन्थरपुरन्दरदेववृन्दैरभ्यर्चिताङ्घ्रियुगले करुणार्द्रचित्ते।
भव्यं सुगन्धमाचमनं गृहाण भक्तयार्पितं कमलभूषितहस्तयुक्ते॥
ॐ सर्वलोकस्य या माता या माता लोक[illegible]विनी।
ददाम्याचमनंतस्यै महालक्ष्म्यै प्रयत्नतः॥
चन्द्रा प्रभासां यशसा ज्वलन्तीं श्रियं लोके देव जुष्टामुदाराम।
तां पद्मिनीमीं शरणं प्रपद्येऽअलक्ष्मी में नश्यतां त्वां वृणे॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः।
स न पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः॥
नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥
वरदायै नमः श्री रेतत आचमनीयं सुधा॥

मधुपर्क :-

दधिमधुसमायुक्तं पात्रयुग्मसमन्वितम् ।
मधुपर्कं गृहाण त्वं शुभदा भव शोभने ॥
कपिलादधि कुन्देन्दुधवलं मधु संयुतम् ।
स्वर्णपात्रस्थितं देवि मधुपर्कं गृहाण मे ॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तु या अन्तरा याश्च बाह्याअलक्ष्मीः ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
भक्त प्रियायै नमः श्री रेष ते मधुपर्कः सुधा ॥

आचमनं :-

ॐ कर्पूरवासितं वारि निर्मलं शुद्धिहेतुकम् ।
गृहाण परमेशानि पुनराचमनीयकम् ॥
आदित्य वर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तु या अन्तरा याश्च बाह्याअलक्ष्मीः ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
भक्त प्रियायै नमः श्री रेतत आचमनीयं नमः ॥

स्नानं :-

काश्मीरचूर्णमृगनाभिविमिश्रितेन पूतेन हेमकलशस्थसुशीतलेन ।
तीर्थोदकेन शिशुना विनिवेदितेन स्नानं विधेहि सफलं कुरु मे श्रमत्वम् ॥
ॐ एहि पादुकया देवि स्नानार्थं स्नान मण्डपम् ।
स्नानशाटीं गृहीत्वा तु स्नानासनसमागता ॥

सुगन्धितैल गव्यादि पञ्चामृत जलादिकम् ।
सुगन्धिश्लक्ष्ण चूर्णं च तथोद्वर्तनकादिकम् ॥
नानातीर्थोद्भवं तोयं स्नानीयं च गृहाण मे ।
प्रत्यग्रसूर्यकिरणोपमतुल्यकान्तिं प्रौढोल्लसल्ललितगन्धयुतं सुरम्यम् ॥
आखण्डलप्रमुखदेवगणैः सुपूज्ये भक्त्या गृहाण मम कुङ्कुमदिव्यचूर्णम् ।
आदित्यवर्णेतपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ॥
तस्य फलानि तपसा नुदन्तु या अन्तरा याश्च बाह्याअलक्ष्मीः ।
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ॥
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ।
नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ।
भक्त प्रियायै नमः श्री रेतते स्नानीयं नमः । आपोहिष्ठेति मलापकर्ष्णम् ॥

(१) ॐ आपो हि ष्ठा मयो भुवः । (२) ॐ ता न ऊर्जे दधातन । (३) ॐ महे रणाय चक्ष से । (४) ॐ योवः शिवतमो रसः । (५) ॐ तस्य भाजयतेह नः । (६) ॐ उशतीरिव मातरः । (७) ॐ तस्मा अरं गमामवः (८) ॐ यस्यक्षयायजिन्वथ ।

पञ्चामृत स्नानं :–

मार्गश्रमापहमतीवसुगन्धयुक्तं पञ्चामृतस्नपनमम्ब रमे सुरम्यम् ।
दारिद्र्यदुःखभयहारिणि मामकीनमङ्गीकुरुष्व कुरुणां कुरु मे सुपूज्ये ॥
ॐ पयोदधि घृतं चैव शर्करा मधु संयुतम् ।
पञ्चामृतं मयानातं गृहाण परमेश्वरि ॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तववृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तु या अन्तरा याश्च बाह्याअलक्ष्मीः ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरिता त्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सतत नमः ।

नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
भद्रायै नमः श्री रेतते पञ्चामृतस्नानं नमः।
शुद्धोदकेन स्नानम्। जातवेदसे, इति पुनराचमनीयम् ॥
पञ्चोपचारै सम्पूज्य निर्माल्यंविश्रिज्य पुनः सम्पूज्य।
अभिषेकं कुर्यात श्री सूक्तम पुरूष स्मताम् ॥

शुद्धोदक स्नानं – (शुद्ध जल से स्नान कराये)

ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः।
श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा ॥
यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः।
गङ्गा च यमुना चैव गोदावरी सरस्वती ॥
नर्मदा सिन्धु कावेरी स्नानार्थं प्रति गृह्यताम्।
अभिषेक शुद्धोदक स्नानम् समर्पयामि ॥

पुरुषसूक्तम्

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमि ँ् सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
पुरुष एवेद ँ् सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥
ततो विराडजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥
तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥

तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दा ँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९ ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ॥ १० ॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
उरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रो अजायत ॥ ११ ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥
नाभ्या आसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥ १३ ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

॥ पुरुषसूक्तं सम्पूर्णम् ॥

श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ॥ १ ॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्।
श्रियं देवीमुप ह्वये श्रीर्मा देवी जुषताम्॥ ३॥
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोप ह्वये श्रियम्॥ ४॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे॥ ५॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु या अन्तरा याश्च बाह्या अलक्ष्मीः॥ ६॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ ७॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ ८॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम्॥ ९॥
मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ १०॥
कर्दमेन प्रजा भूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ ११॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले॥ १२॥
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥ १३॥
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥ १४॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्॥ १५॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥
पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि सं नि धत्स्व ॥ १७ ॥
पद्मानने पद्मऊरू पद्माक्षि पद्मसम्भवे ।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ १८ ॥
अश्वदायि गोदायि धनदायि महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥ १९ ॥
पुत्रपौत्रधनं धान्यं हस्त्यश्वाश्वतरी रथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥ २० ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणो धनमश्विना ॥ २१ ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ २२ ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्त्या श्रीसूक्तजापिनाम् ॥ २३ ॥
सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ २४ ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं भूमिं नमाम्यच्युतवल्लभाम् ॥ २५ ॥
महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥ २६ ॥
आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः ।
ऋषयः श्रियः पुत्राश्च श्रीर्देवीर्देवता मताः ॥ २७ ॥
ऋणरोगादिदारिद्र्यपापक्षुदपमृत्यवः ।
भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥ २८ ॥

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ २९ ॥

॥ ऋग्वेदोक्तं श्रीसूक्तं सम्पूर्णम् ॥

वस्त्रं :-

सूक्ष्मतन्तुभवं वस्त्रं निर्मितं विश्वकर्मणा ।
लोकलज्जाहरं देवि गृहाण सुरसत्तमे ॥
ॐ दिव्याम्बरं नवं श्वेत क्षौमं चातिमनोहरम् ।
त्रैलोक्यजननि देवि दीयमानं गृहाण मे ॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेवसिन्धुं दुरितात्यग्निः ॥
नमोदेव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
श्री महालक्ष्म्यै नमः एतते वस्त्र युग्मं नमः ॥
आचमनीयम् यज्ञोपवीतमन्य आचमनीयम्
ॐ यज्ञोपवीतं परमं पवित्रं प्रजापते यव सहजं पुरस्तात्
आयुष्यमग्रंथ प्रतिमुश्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः

अलंङ्कार :-

रत्नस्वर्ण विकारं च देहसौभाग्यविवर्धनम् ।
शोभाधारं श्रीकरं च भूषणं प्रतिगृह्यताम् ॥
चक्षुर्भ्यां कज्जलं रम्यं सुभगे शान्तिकारके ।
कर्पूरज्योतिरुत्पन्नं गृहाण परमेश्वरि ॥
ॐ महालक्ष्म्यै नमः कज्जलं समर्पयामि ॥
मुक्ताफलयुतां मालां रत्नवैडूर्यसुप्रभाम् ।
माणिक्यस्वर्णग्रथितां गृह्यतां वरदे नमः ॥

ॐ महालक्ष्म्यै नमः सुवर्णा दमालां समर्पयामि ।
सौभाग्यसूत्र व्ररदे सुवर्णमणिसंयुते ॥
कण्ठे बघ्नामि देवेशि सौभाग्यं देहि मे सदा ।
ॐ महालक्ष्म्यै नमः सौभाग्यसूत्रं समर्पयामि ॥
ताडपत्रं मया देवि हेमनिर्मितमुत्तमम् ।
कर्णाभ्यां भूषणं देवि गृहाण जगदम्बिके ॥
ॐ महालक्ष्म्यै नमः कर्णभूषणं समर्पयामि ।
हारकं कण्ठकेयूरमेखलाकुण्डलादिभिः ।
रत्नाढ्यं कुण्डलोपेतं भूषणं प्रतिगृह्यताम् ॥
ॐ महालक्ष्म्यै नमः विशिष्टालङ्कारान् समर्पयामि ।
एहि देवि विभूषार्थं नेपथ्यागार मुत्तमम् ।
विभूषासनमास्थाय तथा दर्श विलोक्यच ॥
केश प्रसाधनं कृत्वा भूषणान्यङ्ग सात् कुरु ।
रत्न कङ्कण वैडूर्य मुक्ताहारादिकानि च ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥
ॐ जातवेदसे सुनवाम सोममरातीं यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वे व सिन्धु दुरितात्यग्निः ॥
नमोदेव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणता स्मताम् ॥
हिरण्यायै नमः श्री रेतानि ते भूषणानि नमः ॥

गंध :– (केशरमिश्रित चन्दन, रक्तचन्दन)

रक्तचन्दनसंमिश्रं पारिजातसमुद्भवम् ।
मया दत्तं गृहाणाशु चन्दनं गन्धसंयुतम् ॥
एहि देवि निजंस्थानिं सिंहासन मनुत्तमम् ।
पूजा चक्रं समास्थाय गन्धं देव्यङ्गसातकुरु ॥

चन्दना गुरु कर्पूर कुंकुमाद्यैः समन्वितम् ।
कस्तूरीरोचनायुतं गन्धं देवि गृहाण मे ॥
गंध द्वारां दुराघर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम् ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेवसिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
श्री रेष ते गंधो नमः ॥

हरिद्रां :–

हरिद्रां च मायानीतां देवि कल्याणदायिनि ।
सौभाग्यवर्धना नित्यं गृहाण हरिवल्लभे ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ।
हरिद्रारञ्जिते देवि सुखसौभाग्यदायिनि ।
तस्मात्त्वां पूजयाम्यतत्र दुःखशान्ति प्रयच्छ मे ॥
हरिप्रियायै नमः श्री रेतत्ते हारिद्रं नमः ॥

कुंकुम :–

कुङ्कुमं कान्तिदं दिव्यं कामिनीकामसंभवम् ।
कुङ्कुमेनार्चिते देवि प्रसीद परमेश्वरि ॥
कुंकुमं शोभनं दिव्यं सर्वदा मङ्गलप्रदम् ।
मयानीतं महादेवि तुभ्यं दास्यामि सुन्दरि ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम ॥
मङ्गलायै नमः श्री रेतत्ते कुंकुमं नमः ॥

सिन्दूरम् :-

सिन्दूरं शुभदं नित्यं महाशक्ति प्रियं सदा ।
प्रयच्छामि महादेवि सर्व सौभाग्यदायिनि ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
सिन्दूरमरुणाभासं जपाकुसुमसन्निभम् ।
पूजितासि मया देवि प्रसीद परमेश्वरि ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
महादेव्यै नमः श्रीरेतत्ते सिन्दूरं नमः ॥

अक्षते :-

गङ्गाजलेन परिधौतमलं सुदीप्तं नानासुगन्धयुतकुङ्कुमरञ्जितं च ।
श्रीसोमरश्मिधवले कृपया गृहाण पूज्ये सुरैः सततमक्षतमालिकां मे ॥
शुद्धमुक्ताफलाभैस्तैरक्षतैः शशिसन्निभैः ।
सर्वाधिपे महालक्ष्मी द्योंतयामि सुभक्तितः ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेवसिन्धुं दुरितात्यग्नि ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
देव्यै नमः श्री रेतते अक्षताः नमः ॥

पुष्पाणि :-

उद्यानराजिषु विराजितपादपेभ्यो बीजाक्षरं तवमुहुर्जपतासुरम्यम् ।
सन्त्रोटितं विविधगन्धयुतं प्रफुल्लं पुष्पं गृहाण जगदीश्वरि बालकस्य ॥

अनेकपुष्पसंयुक्तं संख्याषोडशसंयुतम् ।
आनन्दिनन्दिनोत्पन्नं पद्मायै कुसुमं नमः ॥
ॐ महालक्ष्म्यै नमः चित्रविचित्रषोडशपुष्पाणि समर्पयामि ।
मालती मल्लिकादीनि नवानि कुसमाणि च ।
एकनाथे प्रयच्छामि पुष्पाणि प्रतिगृह्यताम् ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
एक नाथायै नमः श्री रेतानि पुष्पाणि वौषट् ॥

पुष्पमाला :–

रक्तैः श्वेताम्बुजैः पुष्पैर्मल्लिकादिविचित्रितैः ।
पुष्पमालां प्रयच्छामि प्रसीदत्वं सुरेश्वरि ॥
पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः ।
पूजार्थं ग्रथिता तुभ्यं मालेयं प्रतिगृह्यताम् ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
श्रीरेषा ते पुष्पमाला नमः ॥

अथ पुष्पपूजा :–

ॐ लक्ष्म्यै नमः सुवर्णपुष्पं समर्पयामि । ॐ ऐरावतस्थितायै नमः पद्मपुष्पं स० । ॐ लोकवन्दितायै नमः सेवन्तिका पुष्पं स० । ॐ वैष्णव्यै नमः गोकर्णपुष्प स० । ॐ विद्युल्लतायै नमः मुनिपुष्पं स० । ॐ सिद्धिदायै नमः जपापुष्पं स० ।

ॐ वेदमात्रे नमः केतकीपुष्पं स॰ । ॐ जयायै नमः जातीपुष्पं स॰ । ॐ इन्दिरायै तगरपुष्पं स॰ । ॐ प्रकृत्यै नमः कवीरपुष्पं स॰ । ॐ शान्त्यै नमः धत्तूरपुष्पं स॰ । ॐ ऋध्यै नमः पारिजातपुष्प स॰ । ॐ सिध्यै नमः बकुलपुष्पं स॰ । ॐ तुष्ट्यै नमः विष्णुक्रान्तपुष्पं स॰ । ॐ करवीरक्षेत्राधिपत्यायै नमः चम्पकपुष्पं समर्पयामि ।

परिमल द्रव्य :-

सुगन्धं शीतलं शुभ्रं नाना गन्धं समन्वितम् ।
प्रीत्यर्थं तव देवेशि संच्चूर्णं प्रतिगृह्यताम् ॥
चन्दनागरुकर्पूरकुङ्कुमं रोचनं तथा ।
कस्तूर्यादिसुगन्धाश्च सर्वाङ्गेषु विलेपये ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
सुभगायै नमः श्रीरेतत्ते परिमलद्रव्यं नमः ।

दूर्वादिपूजा :-

विष्णवादिसर्वदेवानां प्रियपत्रां सुशोभनीम् ।
क्षीरसागरसभूतां दूर्वां स्वीकुरु सर्वदा ॥

दिकं ततो दत्वा भावपुष्पैः प्रपूजयेत् । समेखलां पद्ममालां पुष्प नानाविधं तथा । सप्तदीपसमुद्भूतं दद्याद्देव्यै सुसाधकः । प्रदीपमुज्जलं कृत्वा महालक्ष्म्यै निवेदयेत् । नैवेद्यं षड्रसोपेतं महादेव्यै निवेदयेत् । दधिक्षीरसागरं च नानामूलफलानि च । भक्ष्यं भोज्यं तथा चोष्यं लेह्यं पेयं च चर्वणम् । रत्नपात्रे परिष्कृत्य ताम्बूलं च निवेदयेत् । ब्रह्माण्डोद्भववस्तूनि चर्व्यचोष्यादिकानि च । फलपुष्पं तथा गन्धं वस्त्रालङ्कारमेव च । तत्सर्वं मनसा चैव महालक्ष्म्यै निवेदयेत् । नगर्यां पथि हट्टे वा दृष्टवा द्रव्यं मनोहरम् । तत्सर्वं मनसा देवि महालक्ष्म्यै निवेदयेत् ।

शिवार्चनचन्द्रिकायाम् – अखण्डास्तण्डुला धौता अक्षताः परिकीर्तिताः । श्वेता शम्भौ तदन्यत्र कुङ्कु माक्ताः स्मृता बुधैः । विभवे रत्नमुक्ताद्यैरक्षतैरर्चयेत्सुरान् ।

(१) असूत्रग्रथितं पुष्पं मधुनाभ्युक्षितैश्च तु । अवालुकायुतं तोयं सर्वं पर्युषितं भवेत् ॥

त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरासुरैः।
सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव॥

ॐ महालक्ष्म्यै नमः दू[१]र्वांकुरान् समर्पयामि। ॐ श्रियै नमः दूर्वा स०। ॐ लक्ष्म्यै नमः दूर्वा स०। ॐ कालिकायै नमः दूर्वा स०। ॐ महाकाल्यै नमः दूर्वा स०। ॐ विकराल्यै नमः दूर्वा स०। ॐ त्रैलोक्यजनन्यै नमः दूर्वा स०। ॐ एकनाथायै नमः दूर्वा स०। ॐ रेणुकायै नमः दूर्वा स०। ॐ राममात्रे नमः दूर्वा स०। ॐ शिवायै नमः दूर्वा स०। ॐ भूतनाथायै नमः दूर्वा स०। ॐ भक्तवत्सलायै नमः दुर्वा स०। ॐ भवान्यै नमः दूर्वा स०। ॐ सिद्धेश्वर्यै नमः दूर्वा स०। ॐ विश्वरूपिण्यै नमः दूर्वा स०। ॐ सर्वाण्यै नमः दूर्वा समर्पयामि।

दू[२]र्वाषोडशकं चैव प्रवालाद्यष्टकं तथा।
अष्टौ अष्टौ गृहीत्वा तु मालतीसाक्षतैस्तथा।
फलं षोडशकं देवि गृहाण वरदा भव॥

ॐ महालक्ष्म्यै नमः मालतीपुष्पाणि अक्षतान् च समर्पयामि। ॐ श्रियै नमः पद्मपत्रं स०। ॐ लक्ष्म्यै नमः दूर्वापत्रं स०। ॐ पद्मायै नमः तुलसीपत्र[३] स०। ॐ धात्र्यै नमः बिल्वपत्रं[४] स०। ॐ रमायै नमः चम्पकपत्रं स०। ॐ वरदायै नमः बकुलपत्रं स०। ॐ लोकमात्रे नमः मालतीपत्रं स०। ॐ चतुर्भुजायै नमः जातीपत्रं स०। ॐ ऋध्यै नमः आम्रपत्रं स०। ॐ सिध्यै नमः मल्लिकापत्रं स०। ॐ पुष्ट्यै नमः अपामार्गपत्रं स०। ॐ तुष्ट्यै नमः अशोकपत्रं स०। ॐ इन्दिरायै नमः कबीरपत्रं स०। ॐ हरिप्रियायै नमः बदरीपत्रं स०। ॐ भूत्यै नमः दाडिमीपत्रं स०।

---

(१) नैव छिन्द्याद्रवौ दूर्वाम्' इति आह्निकसंग्रहवचनात्।

(२) भविष्ये – काण्डानि षोडशादाय यत्संख्यानक्षतानथ। श्रीसुक्तैरर्चयेद्देवीं काण्डादक्षत्रमीति च। ततः पुष्पाणि सङ्गृह्य पूजयेन्नामभिः पृथक् चञ्चलायै नमः पादावन्ते कुसुमं नमः॥

(३) विना तुलस्या स्नानाङ्ग श्राद्धयज्ञार्चनं प्रिये। न संपूर्णफलं प्राहुः सर्व एव विपश्चितः॥ सुन्दरीभैरवीकालीब्रह्मविष्णुविवस्वताम्। विना तुलस्याया पूजा सा पूजा निष्फला भवेत्॥ सावित्रीं च भवानीं च दुर्गादेवीं सरस्वतीम्। योऽर्चयेत्तुलसीपत्रैः सर्वकामैः स मेधते॥

(४) अमारिक्तासु सङ्क्रान्तावष्टम्यामिन्दुवासरे।
बिल्वपत्रं न च च्छिन्द्याच्छिन्द्याच्चेन्नरकं व्रजेत्॥

ॐ ईश्वर्यै नमः अगस्तिपत्रं स०। ॐ पार्वत्यै नमः धत्तूरपत्रं स०। ॐ शान्तिरूपिण्यै नमः सेवन्तिकापत्रं स०। ॐ देव्यै नमः सिन्दूरपत्रं स०। ॐ शिवायै नमः शमीपत्रं स.। ॐ भवान्यै नमः कदलीपत्रं समर्पयामि।

अथाङ्गपूजा :-

ॐ चञ्चलायै न[१]मः पादौ पूजयामि। ॐ चपलायै नमः गुल्फौ पूजयामि। ॐ कान्त्यै नमः जानुनी पूजयामि। ॐ मङ्गलायै नमः जङ्घे पूजयामि। ॐ भद्रकाल्यै नमः उरू पूजयामि। ॐ कमलिन्यै नमः कटिं पूजयामि। ॐ शिवायै नमः नाभिं पूजयामि। ॐ क्षमायै नमः उदरं पूजयामि। ॐ गौर्यै नमः हृदयं पूजयामि। ॐ सिंहवाहिन्यै नमः स्तनद्वयं पूजयामि। ॐ स्कन्दमात्रे नमः भुजद्वयं पूजयामि। ॐ कम्बुकण्ठायै नमः कण्ठं पूजयामि। ॐ सरस्वत्यै नमः मुखं पूजयामि। ॐ सुवासिन्यै नमः नासिकां पूजयामि। ॐ स्वर्णकुण्डलायै नमः कर्णद्वयं पूजयामि। ॐ चण्डायै नमः नेत्रद्वयं पूजयामि। ॐ शिवायै नम ललाटं पूजयामि। ॐ कुमार्यै नमः शिरः पूजयामि। ॐ सर्वरूपिण्यै नमः सर्वाङ्गं पूजयामि।

वाराहपुराणान्तर्गताष्टोत्तरशतमहालक्ष्मीनाममन्त्रैः देव्युपरि कमलपुष्प-प्रक्षेपः कार्यः –

ॐ प्रकृत्यै नमः १. ॐ विकृत्यै नमः २. ॐ विद्यायै नमः ३. ॐ सर्वभूतहितप्रदायै नमः ४. ॐ श्रद्धायै नमः ५. ॐ विभूत्यै नमः ६. ॐ सुरभ्यै नमः ७. ॐ परमात्मिकायै नमः ८. ॐ वाचे नमः ९. ॐ पद्मालयायै नमः १०. ॐ पद्मायै नमः ११. ॐ शुच्यै नमः १२. ॐ स्वाहायै नमः १३. ॐ स्वधायै नमः १४. ॐ सुधायै नमः १५. ॐ धान्यायै नमः १६. ॐ हिरण्मय्यै नमः. १७. ॐ लक्ष्म्यै नमः १८. ॐ नित्यपुष्टायै नमः १९. ॐ विभावर्यै नमः २०. ॐ अदित्यै नमः २१. ॐ दित्यै नमः २२. ॐ दीप्तायै नमः २३. ॐ वसुधायै नमः २४. ॐ वसुधारिण्यै

---

(१) शान्तौ पूजने च नमो वदेत्॥ वौष्ट् संमोहनोद्दीपपुष्टिमृत्युञ्जयेषु च। हुंकारं प्रीतिनाशे च छेदने मारणे तथा॥ उच्चाटने च विद्वेषे तथा धीविकृतो तु फट्। विघ्नग्रहविनाशे च हुंफट्कारं प्रयोजयेत्॥ मन्त्रोदीपनकार्ये च लाभालाभे वषट् स्मृतम्।

नमः २५. ॐ कमलायै नमः २६. ॐ कान्तायै नमः २७. ॐ कामाक्ष्यै नमः २८. ॐ क्रोधसंभवायै नमः २९. ॐ अनुग्रहप्रदायै नमः ३०. ॐ बुद्ध्यै नमः ३१. ॐ आद्यायै नमः ३२. ॐ हरिवल्लभायै नमः ३३. ॐ अशोकायै नमः ३४. ॐ अमृतायै नमः ३५. ॐ दीप्तायै नमः ३६. ॐ लोकशोकविनाशिन्यै नमः ३७. ॐ धर्मनिलयायै नमः ३८. ॐ करुणायै नमः ३९. ॐ लोकमात्रे नमः ४०. ॐ पद्मप्रियायै नमः ४१. ॐ पद्महस्तायै नमः ४२. ॐ पद्माक्षायै नमः ४३. ॐ पद्मसुन्दर्यै नमः ४४. ॐ पद्मोद्भवायै नमः ४५. ॐ पद्ममुख्यै नमः ४६. ॐ पद्मनाभप्रियायै नमः ४७. ॐ रमायै नमः ४८. ॐ पद्ममालाधरायै नमः ४९. ॐ देव्यै नमः ५०. ॐ पद्मिन्यै नमः ५१. ॐ पद्मगन्धिन्यै नमः ५२. ॐ पुष्पगन्धायै नमः ५३. ॐ सुप्रसन्नायै नमः ५४. ॐ प्रसादाभिमुख्यै नमः ५५. ॐ प्रभायै नमः ५६. ॐ चन्द्रवदनायै नमः ५७. ॐ चन्द्रायै नमः ५८. ॐ चन्द्रसहोदर्यै नमः ५९. ॐ चतुर्भुजायै नमः ६०. ॐ चन्द्ररूपायै नमः ६१. ॐ इन्दिरायै नमः ६२. ॐ इन्दुशीतलायै नमः ६३. ॐ आह्लादजनन्यै नमः ६४. ॐ पुष्ट्यै नमः ६५. ॐ शिवायै नमः ६६. ॐ शिवकर्यै नमः ६७. ॐ सत्यै नमः ६८. ॐ विमलायै नमः ६९. ॐ विश्वजनन्यै नमः ७०. ॐ दारिद्रयनाशिन्यै नमः ७१. ॐ प्रीतिपुष्करिण्यै नमः ७२. ॐ शान्तायै नमः ७३. ॐ शुक्लमाल्याम्बरायै नमः ७४. ॐ श्रियै नमः ७५. ॐ भास्कर्यै नमः ७६. ॐ बिल्वनिलयायै नमः ७७. ॐ परारोहायै नमः ७८. ॐ यशस्विन्यै नमः ७९. ॐ उदाराङ्गायै नमः ८०. ॐ वसुन्धरायै नमः ८१. ॐ हरिण्यै नमः ८२. ॐ हेममालिन्यै नमः ८३. ॐ धनधान्यकर्यै नमः ८४. ॐ सिद्धायै नमः ८५. ॐ स्त्रैणसौम्यायै नमः ८६. ॐ शुभप्रदायै नमः ८७. ॐ नृपवेश्मगतानन्दायै नमः ८८. ॐ वरदलक्ष्म्यै नमः ८९. ॐ वसुप्रदायै नमः ९०. ॐ शुभायै नमः ९१. ॐ हिरण्यप्राकारायै नमः ९२. ॐ समुद्रतनयायै नमः ९३. ॐ जयायै नमः ९४. ॐ मंगलायै नमः ९५. ॐ विष्णुवक्षस्थलस्थिरायै नमः ९६. ॐ विष्णुपत्न्यै नमः ९७. ॐ प्रशन्नाक्ष्यै नमः ९८. ॐ प्रसन्नाननायै नमः ९९. ॐ नारायणसमाश्रितायै नमः १००. ॐ दारिद्र्यध्वंसिन्यै नमः १०१. ॐ सर्वोपद्रववारिण्यै नमः १०२. ॐ नवदुर्गायै नमः

१०३. ॐ महाकाल्यै नमः १०४. ॐ ब्रह्मा विष्णु शिवात्मिकायै नमः १०५. ॐ त्रिकालज्ञानसम्पन्नायै नमः १०६. ॐ भुवनेश्वर्यै नमः १०७. ॐ कार्यसाधिकायै नमः १०८.

अथावरणपूजा :–

(१) **विन्दौ** – ॐ महालक्ष्म्यै नमः महालक्ष्मीं पूजयामि। दक्षिणपार्श्वे – ॐ शङ्करानन्दनाथ नमः शङ्करनन्दनं पूजयामि। ॐ शंखनिधये नमः शङ्खनिधिं पूजयामि। वामपार्श्वे – ॐ पुष्पाञ्जलिपुठाय नमः पुष्पाञ्जलिपुठं पूजयामि। ॐ पुष्पधन्विने नमः पुष्पधन्विनं पूजयामि। ॐ पद्मनिधये नमः पद्मनिधिं पूजयामि। पुरतः – ॐ दक्षिणपादप्रक्षालनोद्यतायै नमः दक्षिणपादप्रक्षालनोद्यतां पूजयामि। ॐ जन्हुसुतायै नमः जन्हुसुतां पूजयामि। वामपादप्रक्षालनोद्यतायै नमः वामपादप्रक्षालनोद्यतां पूजयामि। ॐ सूर्यसुतायै नमः सूर्यसुतां पूजयामि। पृष्ठतः – ॐ वरुणायै नमः वरुणां पूजयामि। इति पञ्चोपचारैः संपूज्य – ॐ दयाब्धे त्राहि संसार सर्पान् मां शरणागतम्। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

(२) **त्रिकोणे** – ॐ पद्मायै नमः पद्मां पूजयामि। ॐ कमलायै नमः कमलां पूजयामि। ॐ इन्दिरायै नमः इन्दिरां पूजयामि। ॐ दयाब्धे त्राहि संसार सर्पान् मां शरणागतम्। भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम्॥

(३) **षट्कोणे** – आग्नेये – ॐ हिरण्मय्यै नमः हिरण्मयीं पूजयामि। ईशाने – ॐ चन्द्रायै नमः चन्द्रां पूजयामि। नैर्ऋत्ये – ॐ रजतस्त्रजायै नमः रजतस्त्रजां पूजयामि। वायव्ये – ॐ हिरण्यस्त्रजायै नमः हिरण्यस्त्रजां पूजयामि। देव्या अग्रतः – ॐ हिरण्यवर्णायै नमः हिरण्यवर्णां पूजयामि। पुरतः आरभ्य चतुर्दिक्षु – ॐ हिरण्यवर्णायै नमः हिरण्यवर्णां पूजयामि।

ॐ दयाब्धे त्राहि संसार सर्पान् मां शरणागतम्।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम्॥

(४) **अष्टपत्रे** – ततः पुरत आरभ्य प्रादक्षिण्यक्रमेणाष्टदलमध्येषु – ॐ महाकन्यायै नमः महाकन्यां पूजयामि। ॐ महादेव्यै नमः महादेवीं पूजयामि। ॐ भक्तानुग्रहकारिण्यै नमः भक्तानुग्रहकारिणीं पूजयामि।

ॐ स्वप्रकाशात्मरूपिण्यै नमः स्वप्रकाशात्मरूपिणीं पूजयामि । ॐ महामायायै नमः महामायां पूजयामि । ॐ महेश्वर्यै नमः महेश्वरीं पूजयामि । ॐ वागीश्वर्यै नमः वागीश्वरीं पूजयामि । ॐ जगद्धात्र्यै नमः जगद्धात्रीं पूजयामि । ॐ दयाब्धे त्राहि संसार सर्पान् मां शरणागतम् । भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥

(५) **दशपत्रेषु** – ॐ उमायै नम : उमां पूजयामि । ॐ महाकाल्यै नमः महाकालीं पूजयामि । ॐ महासरस्वत्यै नमः महासरस्वतीं पूजयामि । ॐ दुर्गायै नमः दुर्गां पूजयामि । ॐ गङ्गायै नमः गङ्गां पूजयामि । ॐ यमुनायै नमः यमुनां पूजयामि । ॐ महाशौर्यै नमः महाशौरीं पूजयामि । ॐ गायत्र्यै नमः गायत्रीं पूजयामि । ॐ रमायै नमः रमां पूजयामि । ॐ त्रिलोचनायै नमः त्रिलोचनां पूजयामि । ॐ दयाब्धे त्राहि संसार सर्पान् मां शरणागतम् । भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

(६) **द्वादशपत्रेषु** – ॐ भद्रकाल्यै नमः भद्रकालीं पूजयामि । ॐ त्रिलोकात्मिकायै नमः त्रिलोकात्मिकां पूजयामि । ॐ क्रियालक्ष्म्यै नमः क्रियालक्ष्मीं पूजयामि । ॐ लोकमार्गप्रदायिन्यै नमः लोकमार्गप्रदायिनीं पूजयामि । ॐ अरूपायै नमः अरूपां पूजयामि । ॐ सरूपायै नमः सरूपां पूजयामि । ॐ विश्वरूपिण्यै नमः विश्वरूपिणीं पूजयामि । ॐ पञ्चभूतात्मिकायै नमः पञ्चभूतात्मिकां पूजयामि । ॐ देवमात्रे नमःदेवमातरं पूजयामि । ॐ सुरेश्वर्यै नमः सुरेश्वरीं पूजयामि । ॐ दारिद्र्यध्वंसिन्यै नमः दारिद्र्यध्वंसिनीं पूजयामि । ॐ सर्वशक्त्यै नमः सर्वशक्तिं पूजयामि । ॐ दयाब्धे त्राहि संसार सर्पान् मां शरणागतम् । भक्त्या समर्पये तुभ्यं षष्ठावरणार्चनम् ॥

(७) **चतुर्दशपत्रेषु** – ॐ भैरव्यै नमः भैरवीं पूजयामि । ॐ विशालाक्ष्यै नमः विशालाक्षीं पूजयामि । ॐ रुक्मिण्यै नमः रुक्मिणीं पूजयामि । ॐ नारायण्यै नमः नारायणीं पूजयामि । ॐ मित्रविन्दायै नमः मित्रविन्दां पूजयामि । ॐ पद्माक्ष्यै नमः पद्माक्षीं पूजयामि । ॐ क्षेमकर्यै नमः क्षेमकरीं पूजयामि । ॐ सत्यायै नमः सत्यां पूजयामि । ॐ कालिन्दयै नमः कालिन्दीं पूजयामि । ॐ विजयायै नमः विजयां पूजयामि । ॐ कान्तिमत्यै नमः कान्तिमतिं पूजयामि । ॐ रूपिण्यै नमः रूपिणीं पूजयामि । ॐ शारदायै नमः शारदां

पूजयामि । ॐ वेण्यै नमः वेणीं पूजयामि । ॐ दयाब्धे त्राहि संसार सर्पान मां शरणागतम् । भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥

(८) **षोडशपत्रे –** ॐ बलाकायै नमः बलाकां पूजयामि । ॐ विमलायै नमः विमलां पूजयामि । ॐ नवमालिकायै नमः नवमालिकां पूजयामि । ॐ विभीषिकायै नमः विभीषिकां पूजयामि । ॐ शाङ्कर्यै नमः शाङ्करीं पूजयामि । ॐ वसुमालिकायै नमः वसुमालिकां पूजयामि । ॐ मुक्तालङ्कारायै नमः मुक्तालङ्कारां पूजयामि । ॐ वरदायै नमः वरदां पूजयामि । ॐ मुक्त्यै नमः मुक्तिं पूजयामि । ॐ सर्वशास्त्रधारिण्यै नमः सर्वशास्त्रधारिणीं पूजयामि । ॐ समुद्रवसनायै नमः समुद्रवसनां पूजयामि । ॐ ब्रह्माण्डमणिमेखलायै नमः ब्रह्माण्डमणिमेखलां पूजयामि । ॐ अवस्थात्रयनिर्मुक्तायै नमः अवस्थात्रयनिर्मुक्तां पूजयामि । ॐ गुणत्रयविवर्जितायै नमः गुणत्रयविवर्जितां पूजयामि । ॐ योगध्यानैकसंन्यासिन्यै नमः योगध्यानैकसंन्यासिनीं पूजयामि । ॐ योगध्यानैकपरायणायै नमः योगध्यानैकपरायणां पूजयामि । ॐ दयाब्धे त्राहि संसार सर्पान् मां शरणागतम् । भक्त्या समर्पये तुभ्यमष्टमावरणार्चनम् ॥

(९) **अष्टादशपत्रे** – ॐ आद्यलक्ष्म्यै नमः आद्यलक्ष्मीं पूजयामि । ॐ विद्यालक्ष्म्यै नमः विद्यालक्ष्मीं पूजयामि । ॐ सौभाग्यलक्ष्म्यै नमः सौभाग्यलक्ष्मीं पूजयामि । ॐ अमृतलक्ष्म्यै नमः अमृतलक्ष्मीं पूजयामि । ॐ कामलक्ष्म्यै नमः कामलक्ष्मीं पूजयामि । ॐ सत्यलक्ष्म्यै नमः सत्यलक्ष्मीं पूजयामि । ॐ भोगलक्ष्म्यै नमः भोगलक्ष्मीं पूजयामि । ॐ योगलक्ष्म्यै नमः योगलक्ष्मीं पूजयामि । ॐ मुक्तिदात्र्यै नमः मुक्तिदात्रीं पूजयामि । ॐ ऋद्ध्यै नमः ऋद्धिं पूजयामि । ॐ समृद्ध्यै नमः समृद्धिं पूजयामि । ॐ तुष्ट्यै नमः तुष्टिं पूजयामि । ॐ पुष्ट्यै नमः पुष्टिं पूजयामि । ॐ धनेश्वर्यै नमः धनेश्वरीं पूजयामि । ॐ श्रद्धायै नमः श्रद्धां पूजयामि । ॐ भोगिन्यै नमः भोगिनीं पूजयामि । ॐ धान्यायै नमः धान्यां पूजयामि । ॐ वेदत्रयविशोकायै नमः वेदत्रयविशोकां पूजयामि । ॐ दयाब्धे त्राहि संसार सर्पान् शरणागतम् । भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्ः ॥

(१०) **विंशतिपत्रे** – ॐ वेदान्तज्ञानरूपिण्यै नमः वेदान्तज्ञानरूपिणीं पूजयामि। ॐ नागयज्ञोपवीतिन्यै नमः नागयज्ञोपवीतिनीं पूजयामि। ॐ शैलपुत्र्यै नमः शैलपुत्रीं पूजयामि। ॐ ब्रह्मचारिण्यै नमः ब्रह्मचारिणीं पूजयामि। ॐ चित्रघण्टायै नमः चित्रघण्टां पूजयामि। ॐ कूष्माण्डायै नमः कूष्माण्डां पूजयामि। ॐ स्कन्दमात्रे नमः स्कन्दमातरं पूजयामि। ॐ कात्यायन्यै नमः कात्यायनीं पूजयामि। ॐ कालरात्र्यै नमः कालरात्रीं पूजयामि। ॐ महागौर्यै नमः महागौरीं पूजयामि। ॐ सिध्दिदायै नमः सिध्दिदां पूजयामि। ॐ सर्वात्मिकायै नमः सर्वात्मिकां पूजयामि। ॐ विश्वप्रसूत्यै नमः विश्वप्रसूतिं पूजयामि। ॐ रसायै नमः रसां पूजयामि। ॐ नवखण्डवत्यै नमः नवखण्डवतीं पूजयामि। ॐ क्षित्यै नमः क्षितिं पूजयामि। ॐ अनन्तायै नमः अनन्तां पूजयामि। ॐ धरायै नमः धरां पूजयामि। ॐ सर्वसंहारायै नमः सर्वासंहारां पूजयामि। ॐ कैवल्यदायै नमः कैवल्यदां पूजयामि। ॐ दयाब्धे त्राहि संसार सर्पान् मां शरणागतम् भक्त्या समर्पये तुभ्यं दशमावरणार्चनम्॥

(११) **द्वाविंशतिपत्रे** – ॐ वेदिकायै नमः वेदिकां पूजयामि। ॐ वेदरूपिण्यै नमः वेदरूपिणीं पूजयामि। ॐ गिरिसंभवायै नमः गिरिसंभवां पूजयामि। ॐ सूर्यमण्डलसंस्थितायै नमः सूर्यमण्डलसंस्थितां पूजयामि। ॐ सोममण्डलमध्यस्थायै नमः सोममण्डलमध्यस्थां पूजयामि। ॐ वायुमण्डलस्थायै नमः वायुमण्डलस्थां पूजयामि। ॐ वह्निमण्डलसंस्थायै नमः वह्निमण्डलसंस्थां पूजयामि। ॐ शक्तिमण्डलसंस्थायै नमः शक्तिमण्डलसंस्थां पूजयामि। ॐ चक्रिकायै नमः चक्रिकां पूजयामि। ॐ चक्रमध्यसंस्थितायै नमः चक्रमध्यसंस्थितां पूजयामि। ॐ चक्रमार्गप्रदायै नमः चक्रमार्गप्रदां पूजयामि। ॐ सर्वसिद्धान्तमार्गप्रदायै नमः सर्वसिद्धान्तमार्गप्रदायिनीं पूजयामि। ॐ षड्वर्गवर्जितायै नमः षड्वर्गवर्जितां पूजयामि। ॐ प्रत्यक्षादिप्रमावृतायै नमः प्रत्यक्षादिप्रमावृतां पूजयामि। ॐ विद्यामूर्तायै नमः विद्यामूर्तां पूजयामि। ॐ त्रैलोक्यमोहिन्यै नमः त्रैलोक्यमोहिनीं पूजयामि। ॐ विद्यायै नमः विद्यां पूजयामि। ॐ चर्मदायै नमः चर्मदां पूजयामि। ॐ रक्षायै नमः रक्षां पूजयामि। ॐ ब्रह्मस्थापितरूपायै नमः

ब्रह्मस्थापितरूपां पूजयामि । ॐ कैवल्यज्ञानगोचरायै नमः कैवल्यज्ञानगोचरां पूजयामि । ॐ करुणायै नमः करुणां पूजयामि । ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले । भक्त्या समर्पये तुभ्यमेकादशावरणार्चनम् ॥

(१२) **चतुर्विंशतिपत्रे** – ॐ नित्यशुद्धायै नमः नित्यशुद्धां पूजयामि । ॐ नित्यतृप्तायै नमः नित्यतृप्तां पूजयामि । ॐ निर्विकारायै नमः निर्विकारां पूजयामि । ॐ निरीक्षणायै नमः निरीक्षणां पूजयामि । ॐ निराधारायै नमः निराधाराम् पूजयामि । ॐ निस्सङ्कल्पायै नमः निस्सङ्कल्पाम् पूजयामि । ॐ निराश्रयायै नमः निराश्रयां पूजयामि । ॐ निर्विकल्पायै नमः निर्विकल्पां पूजयामि । ॐ निर्यन्त्रायै नमः निर्यन्त्रां पूजयामि । ॐ निर्बीजायै नमः निर्बीजां पूजयामि । ॐ निर्वाणदायिन्यै नमः निर्वाणदायिनीं पूजयामि । ॐ नीरजायै नमः नीरजां पूजयामि । ॐ निखिलायै नमः निखिलां पूजयामि । ॐ निष्कम्पायै नमः निष्कम्पां पूजयामि । ॐ नानास्वरूपचिद्धात्र्यै नमः नानास्वरूपचिद्धात्रीं पूजयामि । ॐ न्यायवस्तुप्रकाशिकायै नमः न्यायवस्तुप्रकाशिकां पूजयामि । ॐ निरञ्जन्यै नमः निरञ्जनीं पूजयामि । ॐ निद्रायै नमः निद्रां पूजयामि । ॐ नयात्मिकायै नमः नयात्मिकां पूजयामि । ॐ नीत्यै नमः नीतिं पूजयामि । ॐ निवृत्त्यै नमः निवृत्तिं पूजयामि । ॐ नृसिंह्यै नमः नृसिंहिं पूजयामि । ॐ निशितृप्तायै नमः निशितृप्तां पूजयामि । ॐ नित्योदितायै नमः नित्योदितां पूजयामि । ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले । भक्त्या समर्पये तुभ्यं द्वादशावरणार्चनम् ।

(१३) **षड्विंशतिपत्रे** – ॐ ऋग्वेदाय नमः ऋग्वेदं पूजयामि । ॐ यजुर्वेदाय नमः यजुर्वेदं पूजयामि । ॐ सामवेदाय नमः सामवेदं पूजयामि । ॐ अथर्ववेदाय नमः अथर्ववेदं पूजयामि । ॐ छन्दोभ्यो नमः छन्दांसि पूजयामि । ॐ ज्यौतिषाय नमः ज्यौतिषं पूजयामि । ॐ निरुक्ताय नमः निरुक्तं पूजयामि । ॐ शिक्षायै नमः शिक्षां पूजयामि । ॐ कल्पाय नमः कल्पं पूजयामि । ॐ व्याकरणाय नमः व्याकरणं पूजयामि । ॐ पुराणेभ्यो नमः पूराणान् पूजयामि । ॐ जम्बूद्वीपाय नमः जम्बूद्वीपं पूजयामि । ॐ प्लक्षद्वीपाय नमः प्लक्षद्वीपं पूजयामि । ॐ कुशद्वीपाय नमः कुशद्वीपं पूजयामि । ॐ क्रौञ्चद्वीपाय

नमः क्रौञ्चद्वीपं पूजयामि। ॐ शाकद्वीपाय नमः शाकद्वीपं पूजयामि। ॐ पुष्करद्वीपाय नमः पुष्करद्वीपं पूजयामि। ॐ अमरावत्यै नमः अमरावतीं पूजयामि। ॐ भोगवत्यै नमः भोगवतीं पूजयामि। ॐ नयनवत्यै नमः नयनवतीं पूजयामि। ॐ सिद्धवत्यै नमः सिद्धवतीं पूजयामि। ॐ गान्धर्ववत्यै नमः गान्धर्ववतीं पूजयामि। ॐ लङ्कावत्यै नमः लङ्कावतीं पूजयामि। ॐ यशोवत्यै नमः यशोवतीं पूजयामि। ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं त्रयोदशावरणार्चनम्॥

(१४) **अष्टाविंशतिपत्रे** – ॐ सूर्याय नमः सूर्यं पूजयामि। ॐ चन्द्रमसे नमः चन्द्रमसं पूजयामि। ॐ भौमाय नमः भौमं पूजयामि। ॐ बुधाय नमः बुधं पूजयामि। ॐ गुरुवे नमः गुरुं पूजयामि। ॐ शुक्राय नमः शुक्रं पूजयामि। ॐ शनये नमः शनिं पूजयामि। ॐ राहवे नमः राहुं पूजयामि। ॐ केतवे नमः केतुं पूजयामि। ॐ ईश्वराय नमः ईश्वरं पूजयामि। ॐ उमायै नमः उमां पूजयामि। ॐ स्कन्दाय नमः स्कन्दं पूजयामि। ॐ विष्णवे नमः विष्णुं पूजयामि। ॐ ब्रह्मणे नमः ब्रह्माणं पूजयामि। ॐ इन्द्राय नमः इन्द्रं पूजयामि। ॐ यमाय नमः यमं पूजयामि। ॐ कालाय नमः कालं पूजयामि। ॐ चित्रगुप्ताय नमः चित्रगुप्तं पूजयामि। ॐ अगनये नमः अग्निं पूजयामि। ॐ अद्भ्यो नमः अपं पूजयामि। ॐ पृथिव्यै नमः पृथिवीं पूजयामि। ॐ विष्णवे नमः विष्णुं पूजयामि। ॐ इन्द्राय नमः इन्द्रं पूजयामि। ॐ इन्द्राण्यै नमः इन्द्राणीं पूजयामि। ॐ प्रजापतये नमः प्रजापतिं पूजयामि। ॐ सर्पेभ्यो नमः सर्पान् पूजयामि। ॐ ब्रह्मणे नमः ब्रह्माणं पूजयामि। ॐ गणपत्यादिसप्तलोकपालेभ्यो नमः गणपत्यादिसप्तलोकपालान् पूजयामि। ॐ अभीष्टसिध्दिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं चतुर्दशावरणार्चनम्॥

(१५) **त्रिंशत्पत्रे** – ॐ अश्विन्यै नमः अश्विनीं पूजयामि। ॐ भरण्यै नमः भरणीं पूजयामि। ॐ कृत्तिकायै नमः कृत्तिकां पूजयामि। ॐ रोहिण्यै नमः रोहिणीं पूजयामि। ॐ मृगशिरायै नमः मृगशिरां पूजयामि। ॐ आर्द्रायै नमः आर्द्रां पूजयामि। ॐ पुनर्वसवे नमः पुनर्वसुं पूजयामि। ॐ पुष्याय नमः पुष्यं पूजयामि। ॐ श्लेषायै नमः श्लेषां पूजयामि। ॐ मघायै नमः मघां पूजयामि।

ॐ पूर्वाफाल्गुन्यै नमः पूर्वाफाल्गुनीं पूजयामि। ॐ उत्तराफाल्गुन्यै नमः उत्तराफाल्गुनीं पूजयामि। ॐ हस्ताय नमः हस्तं पूजयामि। ॐ चित्रायै नमः चित्रां पूजयामि। ॐ स्वात्यै नमः स्वातीं पूजयामि। ॐ विशाखायै नमः विशाखां पूजयामि। ॐ अनुराधायै नमः अनुराधां पूजयामि। ॐ ज्येष्ठायै नमः ज्येष्ठां पूजयामि। ॐ मूलाय नमः मूलं पूजयामि। ॐ पूर्वाषाढाभ्यो नमः पूर्वाषाढां पूजयामि। ॐ उत्तराषाढाभ्यो नमः उत्तराषाढां पूजयामि। ॐ श्रवणाय नमः श्रवणं पूजयामि। ॐ धनिष्ठायै नमः धनिष्ठां पूजयामि। ॐ शतभिषायै नमः शतभिषां पूजयामि। ॐ पूर्वाभाद्रपदाय नमः पूर्वाभाद्रपदं पूजयामि। ॐ उत्तराभाद्रपदाय नमः उत्तराभाद्रपदं पूजयामि। ॐ रेवत्यै नमः रेवतीं पूजयामि। ॐ सप्तऋषिभ्यो नमः सप्तऋषीन् पूजयामि। ॐ भूरादिसंप्तलोकेभ्यो नमः भूरादिसप्तलोकान् पूजयाामि। ॐ अष्टवसुभ्यो नमः अष्टवसून् पूजयामि। ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं पञ्चदशावरणार्चनम् ॥

(१६) **द्वात्रिंशत्पत्रे** – ॐ मेषाय नमः मेषं पूजयामि। ॐ वृषाय नमः वृषं पूजयामि। ॐ मिथुनाय नमः मिथुनं पूजयामि। ॐ कर्काय नमः कर्कं पूजयामि। ॐ सिंहाय नमः सिंहं पूजयामि। ॐ कन्यायै नमः कन्या पूजयामि। ॐ तुलायै नमः तुलां पूजयामि। ॐ वृश्चिकाय नमः वृश्चिकं पूजयामि। ॐ धनाय नमः धनं पूजयामि। ॐ मकराय नमः मकरं पूजयामि। ॐ कुंभाय नमः कुंभं पूजयामि। ॐ मीनाय नमः मीनं पूजयामि। ॐ विष्कम्भादियोगेभ्यो नमः विष्कम्भादियोगान् पूजयामि। ॐ आनन्दाद्यष्टविंशतियोगेभ्यो नमः आनन्दाद्यष्टविंशतियोगान् पूजयामि। ॐ ववादिसप्तकरणेभ्यो नमः ववादिसप्तकरणान् पूजयामि। ॐ स्थिरादिसप्तकरणेभ्यो नमः स्थिरादिसप्तकरणान् पूजयामि। ॐ सप्तवारेभ्यो नमः सप्तवारान् पूजयामि। ॐ एकादशरुद्रेभ्यो नमः एकादशरुद्रान् पूजयामि। ॐ द्वादशादित्येभ्यो नमः द्वादशादित्यान् पूजयामि। ॐ एकोनपञ्चाशन्मरुद्भ्यो नमः एकोन्पञ्चाशन्मरुतान् पूजयामि। ॐ षोडशमातृभ्यो नमः षोडशमातृकान् पूजयामि। ॐ षड्ऋतुभ्यो नमः षड्ऋतून् पूजयामि। ॐ द्वादशमासेभ्यो नमः द्वादशमासान् पूजयामि।

ॐ द्वयनाभ्यां नमः द्वयनौ पूजयामि । ॐ पञ्चदशतिथिभ्यो नमः पञ्चादशतिथीन् पूजयामि । ॐ षष्टिसंवत्सरेभ्यो नमः षष्टिसंवत्सरान् पूजयामि । ॐ सुपर्णेभ्यो नमः सुपर्णान् पूजयामि । ॐ यक्षेभ्यो नमः यक्षान् पूजयामि । ॐ विद्याधरेभ्यो नमः विद्याधरान् पूजयामि । ॐ अप्सरेभ्यो नमः अप्सरान् पूजयामि । ॐ रक्षोभ्यो नमः रक्षान् पूजयामि । ॐ गन्धर्वेभ्यो नमः गन्धर्वान् पूजयामि । ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले । भक्त्या समर्पये तुभ्यं षोडशावरणार्चनम् ॥

ततो भूगृहे – पूर्वादिक्रमेण – ॐ इन्द्राय नमः इन्द्रं पूजयामि । ॐ अग्नये नमः अग्निं पूजयामि । ॐ यमाय नमः यमं पूजयामि । ॐ निर्ऋतये नमः निर्ऋतिं पूजयामि । ॐ वरुणाय नमः वरुणं पूजयामि । ॐ वायवे नमः वायुं पूजयामि । ॐ कुबेराय नमः कुबेरं पूजयामि । ॐ ईशानाय नमः ईशानं पूजयामि । ॐ पश्चिमनिर्ऋतिमध्ये – ॐ अनन्ताय नमः अनन्तं पूजयामि । ॐ पूर्वेशानमध्ये – ॐ ब्रह्मणे नमः ब्रह्माणं पूजयामि । तत्रैव – ॐ वज्राय नमः वज्रं पूजयामि । ॐ शक्तये नमः शक्तिं पूजयामि । ॐ दण्डाय नमः दण्डं पूजयामि । ॐ खड्गाय नमः खड्गं पूजयामि । ॐ पाशाय नमः पाशं पूजयामि । ॐ अङ्कुशाय नमः अङ्कुशं पूजयामि । ॐ गदायै नमः गदां पूजयामि । ॐ त्रिशूलाय नमः त्रिशूलं पूजयामि । ॐ चक्राय नमः चक्रं पूजयामि । ॐ पद्माय नमः पद्मं पूजयामि । तत्रैव ॐ ऐरावताय नमः ऐरावतं पूजयामि । ॐ पुण्डरीकाय नमः पुण्डरीकं पूजयामि । ॐ वामनाय नमः वामनं पूजयामि । ॐ कुमुदाय नमः कुमुदं पूजयामि । ॐ अञ्जनाय नमः अञ्जनं पूजयामि । ॐ पुष्पदन्ताय नमः पुष्पदन्तं पूजयामि । ॐ सार्वभौमाय नमः सार्वभौमं पूजयामि । ॐ सुप्रतीकाय नमः सुप्रतीकं पूजयामि । पुनः पूर्वादिक्रमेणाष्टदिक्ष्वष्ट सिद्धीः पूजयेत् – ॐ अणिम्ने नमः अणिमानं पूजयामि । ॐ महिम्ने नमः महिमानं पूजयामि । ॐ गरिम्ने नमः गरिमानं पूजयामि । ॐ लघिम्ने नमः लघिमानं पूजयामि । ॐ प्राप्त्यै नमः प्राप्तीं पूजयामि । ॐ प्राकाम्यै नमः प्राकामीं पूजयामि । ॐ ईशितायै नमः ईशितां पूजयामि । ॐ वशितायै नमः वशितां पूजयामि । ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले । भक्त्या समर्पये तुभ्यं षोडशावरणार्चनम् ।

धूपादि दद्यात् :–

नानाविधौषधविमिश्रितगन्धयुक्तं श्रीदेवतामनुजदानवसौख्यदं च ।
सौगन्ध्ययुक्तमतुलं जलजाधिवासे धूपं गृहाण कृपया विनिवेदितं मे ।।
ॐ दशाङ्ग गुग्गुलं धूपं चन्दनागुरूसंयुतम् ।
भक्त्या दत्तं मया देवि प्रसीदत्वं महेश्वरि ॥
कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वाना वेव सिन्धु दुरितात्यग्निः ॥
नमो दे ै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
श्री महालक्ष्म्यै नमः श्रीरेषते धूपो नमः ।

दीपकं :–

एकादशतन्तुभिः पुष्पवर्तिकां निक्षिप्य मूलमन्त्रेण प्रज्वाल्य दक्षिणहस्तेन सुप्रज्वालितं दीपपात्रमादाय वामहस्तधृतं घण्टां वादयन्–
कर्पूरमिश्रितघृतैः परिपूर्णाकण्ठं ध्वान्तौघनाशकरणं जगदेकवन्द्ये ।
देदीप्यमानमतुलं स्वदृशा प्रभाभिरङ्गीकुरुष्व कृपया मम दीपमेनम् ॥
ॐ महालक्ष्म्यै नमः साधारणदीपं दर्शयामि ।

अथ विशिष्ट दीपदान प्रकार :–

षोडशदीपान् प्रज्वाल्य संप्रोक्ष्य संपूज्य च – मार्तण्डमण्डलाखण्ड-चन्द्रबिम्बाग्नितेजसम् । गृहाण देवि दीपं मे निर्मितं श्वेतवर्तिभिः ॥ ॐ महालक्ष्म्यै नमः षोडशदीपान दर्शयामि । तत :–

शारदातिलके – गुग्गुलु अगरूशीरशर्करामधुचन्दनैः। धूपयेदाज्य- संमिश्रैर्नीचैर्देवस्य देशिकः॥ तथैव प्रकारान्तरम् - सिताज्यमधुसंमिश्रं गुग्गुल्वगुरूचन्दनम् । षडङ्गधूपमेतत्तु सर्वदेवप्रियं सदा ॥ 'रागतस्त्वर्पयेद्

ॐ कर्पूरवर्ति संयुक्तं गोघृतेन समन्वितम् ।
दीपं गृहाण देवेशि महालक्ष्मि नमोऽस्तुते ॥
आप: सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातंर श्रियं वासय मे कुले ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेद: ।
सन: पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्नि: ॥
नमो देव्यै महा देव्यै शिवायै सततं नम: ।
नम: प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम ॥
श्री महालक्ष्म्यै नम: । श्री रेष ते दीपो नम: ।

नैवेद्यं :–

नैवेद्यपात्रं पुरतो विधाय तत्र सामान्यमण्डलं जलादिना कृत्वा तत्र गन्धाक्षतपुष्पादिना संपूज्य यथाशक्त्यनुसारेण मिष्टान्नादिकं परिवेषणं कुर्यात्–

माणिक्यपात्रपरिवेषितलेह्यचोष्यपेयादिवस्तुसहितं विधिवत्सुपक्वम् ।
नानाविधानपरिवर्तितस्वादुगन्धं नैवद्यमेतदुररि कुरु सेवकस्य ॥

नानाविधानि रम्याणि पक्वानि च फलानि तु । स्वादुरस्यानि कमले गृह्यतां फलदानि तु ॥ रंभाफलं रसालं च नारिकेलसमन्वितम् । फलं गृहाणदेवेशि पुत्रपौत्रफलप्रदे ॥ ॐ महालक्ष्म्यै नमः – नानाफलानि समर्पयामि । सुस्वादुरससंयुक्तमिक्षुवृक्षरसोद्भवम् । अग्निपक्वमपक्वं वा गुडं वै देवि गृह्यताम् ॥ ॐ महालक्ष्म्यै नमः गुडं समर्पयामि । सस्यचूर्णोद्भवं पक्वं स्वस्तिकादिसमन्वितम् । मया निवेदितं देवि पिष्टकं प्रतिगृह्यताम् ॥ ॐ महालक्ष्म्यै नमः पिष्टकं समर्पयामि । पार्थिवं वृक्षभेदं च विविधैर्द्रव्य कारणम् । सुस्वादुरससंयुक्तमैक्षणं प्रतिगृह्यताम् ॥ ॐ महालक्ष्म्यै नमः ऐक्षणं समर्पयामि । देवतालयपातालभूतलाधारधान्यजम् । षोडशाकारकं नैवेद्यं निवेदयामि ॥ सुवासितं शीतलं च पिपासानाशकारणम् । जगजीवनरूपं च जीवनं देवि गृह्यताम् ॥ ॐ महालक्ष्म्यै नमः जलपूरितसुवर्णादिकलशं समर्पयामि । ततः 'अमृतोपस्तरणमसि स्वाहा' इति देव्यै अपोशानार्थं जलं दत्वा ग्रासमुद्राः प्रदर्शयेत्-अंगुष्ठप्रदेशिनीमध्यमाभिः– ॐ प्राणाय स्वाहा ।

अंगुष्ठमध्यमानामिकाभिः— ॐ अपानाय स्वाहा। अंगुष्ठानामिकाकनिष्ठाभिः— ॐ व्यानाय स्वाहा। कनिष्ठातर्जन्यंगुष्ठैः — ॐ समानायस्वाहा। सांगुष्ठाभिः सर्वाभिः— ॐ उदानाय स्वाहा। ततः — स्वाग्रे जवनिकां गोदोहनमात्रं दत्वा 'श्रीम्' इति दशवारं जपेत्। एलोशीरलवङ्गादि — कर्पूरपरिवासितम्। प्राशनार्थं हृतं तोयं गृहाण कमले शुभे॥ ॐ महालक्ष्म्यै नमः — मध्ये पानीयं समर्प्य जवनिकामपसार्य ॐ उत्तरापोशनं कर्तुं तोयमुद्धृत्यमुज्वलम्। मया निवेदितं भक्त्या गृहाण कमले शुभे॥ ॐ महालक्ष्म्यै नमः उत्तरापोशनजलं समर्पयामि। ततः ॐ आत्मतत्वव्यापिनी लक्ष्मी' तृप्यतु। ॐ विद्यातत्वव्यापिनी लक्ष्मी तृप्यतु। ॐ शिवतत्वव्यापिनी लक्ष्मी तृप्यतु। ॐ सर्वतत्वव्यापिनी लक्ष्मी तृप्यतु। इत्याचमनं दत्वा हस्तप्रक्षालनादिगण्डूषान् भावनामात्रेण कारयित्वा तज्जलं पूजास्थांनादन्यत्र बहिः प्रक्षिपेत्। अथवा — समस्त 'श्रीसूक्तम्' एकाग्रचित्तेन पठित्वा नैवेद्यम अर्पणं कुर्यादिति संप्रदायः।

ॐ नैवेद्यं गृह्यतां देवि भक्ष्य भोज्य समन्विता।
षड्रसै रचित दिव्यं धृतेन परिपूरितम्॥
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः।
सनः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः॥
नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥
पूर्णं मालिन्यै नमः श्री रेतते नैवेद्यं सुधा।
मध्ये पानीयम् उत्तरापोशनम पुनराचमनीयम्॥
गौरीर्मिमाय सलिलानि तक्षती एक पदी द्विपदीसा।
चतुष्पदी अष्टपदी नव पदी वभूवुषी सहस्राक्षरा परमे व्योमन्॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहातिवेदः।
सनः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः॥

प्रणोदेवी सरस्वती वाजे भिर्वा जिनीवति ।
यज्ञं वषृधिया वसूः वीणा पुस्तक धारिण्यै नमः ॥
श्री रेतत्ते नैवेद्यं नमः ।

करोद्वर्तनम् :-

ॐ कर्पूर चन्दनोन्मिश्रं दिव्यगन्ध समन्वितम् ।
करोद्वर्तनकं नित्यं ग्रहाण परमेश्वरि ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
माहेश्वर्यै नमः श्रीरेतते करोद्वर्तनं नमः ॥
तत ईशानकोणे मण्डलं कृत्वा तत्र नैवेद्यशेषं किञ्चित् संस्थाप्य ॐ उच्छिष्टबलिभोक्त्रीशेषिकायै नमः – इति मन्त्रेण जलं क्षिपेत् ।

फलं :-

ॐ इदं फलं मयादेवि स्थापितं पुरतस्तव ।
तेन मे सकलावाप्तिर्भ वेज्जन्मनि जन्मनि ॥
ॐ जातवेदसे सुनवाम सोममराति । यतो निदहातिवेदः ।
सनः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो दैव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
सिद्धिदायै नमः । श्री रेतत्ते फलम् ॥

पुनः आचमनीयम् पुंगीफल :-

ॐ पुंगीफलैः सकर्पूरैर्नागबल्लीदलैर्युतम् ।
कर्पूर चूर्ण संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
आर्द्रांयः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।

एलालवङ्गघनसारसुगन्धरम्यं पूजाकुखण्डयुतमास्यसुखप्रदं च ।
ताम्बूलपक्वदलवर्तितवीटकं मे मातर्गृहाण कृपया करुणार्द्रचित्ते ॥
सूर्यां हिरण्मयीं लक्ष्मीं. जातवेदो म आवह ॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वाना वेवसिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
पिङ्गलायै नमः । श्री रेतत्ते **ताम्बूलं** नमः ॥

दक्षिणा द्रव्याणी :–

ॐ हिरण्यगर्भ गर्भस्थं हेम बीजं विभावसोः ।
अनन्त पुण्य फल दमतः शान्ति प्रयच्छमे ॥ दक्षिणां समर्पयामि ।

सुवर्ण पुष्प :–

ॐ जातवेद से सुनवाम सोममराती यतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
राजोपचार देव्यै नमः । श्री रेतते सुवर्ण पुष्पं नमः ।

छत्रं :–

हरिन्मणिगणाबद्धदण्डशक्तिवरप्रदम् ।
सुवर्णकलशं छत्रं गृहाण परमेश्वरि ॥
ॐ महालक्ष्म्यै नमः छत्रं समर्पयामि ।

चामरं :–

वियन्नदीप्रभे हैमे चामरे विशदप्रभे ।
स्वर्णदण्डोपशोभाढ्ये गृहाण परमेश्वरि ॥
ॐ महालक्ष्म्यै नमः चामरे समर्पयामि ।

मञ्चकं :-

प्रबालनालसद्गात्रं मुक्तामञ्चकमण्डितम् ।
पट्टसूत्रमयं दत्तं गृहाण सरसीरुहे ॥
ॐ महालक्ष्म्यै नमः मञ्चकं समर्पयामि ।

दर्पणं :-

सवितृकिरणस्पर्धिस्फुरत्किरणमण्डलम् ।
दर्पणं मुनिभिः क्लृप्तं गृहाण सुरपूजिते ॥
ॐ महालक्ष्म्यै नमः दर्पणं समर्पयामि ।

अत्तरं :-

सुगन्धनिर्मितमित्रं पुष्प साररैनेकधा ।
घ्राणाय ते महालक्ष्मि वरदा भव मंगले ॥
ॐ महालक्ष्म्यै नमः बहुमूल्योपकल्पित ।
सुगन्धित इत्रं समर्पयामि ॥

व्यजनं :-

शीतवायुप्रदं चैव दाहे च सुखदं परम् ।
कमले गृह्यतां चेदं व्यजनं श्वेतचामरम् ॥
ॐ महालक्ष्म्यै नमः व्यजनं समर्पयामि ।

वसनं :-

देहसौन्दर्यबीजं च सदा शोभाविवर्धनम् ।
कार्पासजं च कृत्रिमं च वसनं देवि गृह्यताम् ।
ॐ महालक्ष्म्यै नमः विशिष्टवसनं समर्पयामि ॥

विशेष द्रव्य :-

यद्यद्द्रव्यमपूर्वं च पृथिव्यामतिदुर्लभम् ।
देवभूषाद्यमौर्ग्यं च तद् द्रव्यं देवि गृह्यताम् ॥
ॐ महालक्ष्म्यै नमः विशिष्टद्रव्याणि समर्पयामि ।
ब्रह्माण्डमध्यगतवस्तुतवैव देवि किं दक्षिणां तव कृते प्रददामि मातः तत्रापि

भक्तिपरिपूरितचेतसाऽहमेनां ददामि सफलां कुरु दृष्टिपातैः ॐ महालक्ष्म्यै नमः दक्षिणां समर्पयामि।

नीराजनं :-

ततः – नीराजनदीपं प्रज्वाल्य गन्धपुष्पाक्षतैः सम्पूज्य वामहस्तेन घण्टां वादयन् कर्पूरनिर्मितं दीपं स्वर्णपात्रे निवेशितम्। नीराजनं मया दत्तं गृहाण परमेश्वरि॥ ॐ महालक्ष्म्यै नमः कर्पूरनीराजनं समर्पयामि। ततः देव्याः पादादिमस्तकान्तं त्रिवारं शनैःशनैः परिभ्राम्य पात्रं भूमौ संस्थाप्य एकमाचमनीयं जलं प्रक्षिप्य तत्र स्थिताः सर्वे पुरुषाः बालकाः स्त्रियश्च क्रमेण आरार्तिकं गृह्णीयुः।

ॐ त्वं सूर्यचन्द्ररत्नानि विद्युदग्निस्त्वेमेवहि।
नीराजनं मया दत्तं गृहाण परमेश्वरि॥
तां म आवह जातवेदो लक्ष्मी मन पगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः।
सनः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः॥
नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥
यमुनाद्रिवासिन्यै नमः। श्री रेतते नीराजनम्॥

पुष्पाञ्जली :-

अनेक जन्मार्जित पाप पुञ्ज विनाशते प्राप्त प्रशस्त कीर्तिम्।
पुष्पाञ्जलिं ते वितनामि मातर्दयार्द्र चित्ते सफलं कुरुध्व॥
ॐ महालक्ष्म्यै नमः॥ पुष्पाञ्जली समर्पयामि॥

नमस्कारं :-

नमस्ते सर्वदेवातां वरदासि हरिप्रिये।
या गतिस्त्वप्रपन्नानाम् सा मे भूयात्वदर्चनात्॥
या देवी सर्व भूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥
ॐ महालक्ष्म्यै नमः नमस्कारं समर्पयामि॥

प्रदक्षिणा :-

कायवाङ्मानसं पापं यत्कृतं जन्मजन्मनि।
तन्मे नाशय देवि त्वं प्रदक्षिणविधानतः॥
ॐ महालक्ष्म्यै नमः प्रदक्षिणां समर्पयामि।
ॐ सर्व स्वरूपे सर्वेशे सर्वशक्ति समन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते॥
ॐ जातवेदसे सुनवाम सोममराती यतो निदहातिवेदः।
सनः पर्षदति दुर्गाणि विश्वाना वेव सिन्धुं दुरितात्यग्निः॥
नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥
महाकाल्यै नमः श्री रेतानि प्रदक्षिणानि॥

क्षमापन :-

अबुद्ध मतिरिक्तं वा न्यूनं वा यन्मयार्चितम्।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि॥
ॐ महालक्ष्म्यै नमः क्षमापनं प्रार्थयामि। ततः—

अत्रोत्तराङ्गत्वेन त्रयस्त्रिंशन्नामभिः गन्धपुष्पाक्षतद्वारा महालक्ष्मीं पूजयेत्- ॐ श्रियै नमः। ॐ लक्ष्म्यै नमः। ॐ महालक्ष्म्यै नमः। ॐ वरदायै नमः। ॐ विष्णुपत्न्यै नमः। ॐ वसुप्रियायै नमः। ॐ हिरण्यरूपायै नमः। ॐ स्वर्णमालिन्यै नमः। ॐ रजतस्त्रजायै नमः। ॐ स्वर्णगृहायै नमः। ॐ स्वर्णप्रकाशिकायै नमः। ॐ पद्मवासिन्यै नमः। ॐ पद्महस्तायै नमः। ॐ पद्मप्रियायै नमः। ॐ ईश्वर्यै नमः। ॐ भुक्तिप्रदायै नमः। ॐ मुक्तिप्रदायै नमः। ॐ विभूतिदायै नमः। ॐ ऋध्दिदायै नमः। ॐ समृध्दिदायै नमः। ॐ पुष्टिदायै नमः। ॐ तुष्टिदायै नमः। ॐ धनदायै नमः। ॐ सुभद्रदायै नमः। ॐ भोगिन्यै नमः। ॐ धान्यै नमः। ॐ विधात्र्यै नमः। ॐ गजान्तलक्ष्म्यै नमः। ॐ राजलक्ष्म्यै नमः। ॐ साम्राज्यलक्ष्म्यै नमः। ॐ विजयप्रदायै नमः। ॐ सर्वसौभाग्यदायै नमः। ॐ सूर्यायै नमः। ततः—न मे जन्मनि दौर्भाग्यं न मे जन्म दरिद्रता। महालक्ष्मि नमस्तुभ्यमर्घ्यं मे प्रतिगृह्यताम्॥ ॐ महालक्ष्म्यै नमः त्रिवारं षोडशवारं वा विशेषार्घ्यं समर्पयामि। ततः शङ्खजलं देव्युपरि भ्राम येत् —

ॐ साधु वा कर्म यद्यदाचरितं मया । तत्सर्वं कृपया देवि गृहाणाराधनं मम ॥ इति देव्या वामहस्ते पूजां समर्प्य शङ्खमुद्धृत्य देव्युपरि त्रिः परिभ्राम्य तज्जलं दक्षिणहस्ते आदाय शिरसि मार्जयेत् पल्लवादिनाप्राच्यां दिशि देवऋत्विजो मार्जयन्ताम् । दक्षिणस्यां दिशि मासाः पितरो मार्जयन्ताम् । प्रतीच्यां दिशि गृहाः पशवो मार्जयन्ताम् । उदीच्यां दिशि आप ओषधयो वनस्पतयो मार्जयन्ताम् । ऊर्ध्वायां दिशि यज्ञः संवत्सरो यज्ञपति मार्जयन्ताम् । इति प्रतिदिश तज्जलमुत्सृजेदितितन्त्रक्रमः । ततः — यथा । संख्यपरिमितं श्रीसूक्तपाठं कुर्यात् । देशकालौ संङ्कीर्त्य मम धन-पुत्र-पौत्रादि समृद्धयर्थं नानारोगदूरीकरणार्थं नवग्रहदेवताप्रसन्नार्थं च षोडश-दश-पञ्च शतादिसंख्याकान् स्वयं ब्राह्मणद्वारा पाठान् कारयिष्ये-इति सङ्कल्पपूर्वकं कुर्यात् । अयं पाठः अर्चनाङ्गमिति बोध्यम् । पाठान्ते तु-ॐ गुह्यातिगुह्य गोप्त्रीत्वं गृहाणास्मद् कृतं जपम् । सिध्दिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ इति महालक्ष्म्यै जपं निवेद्य अनेन श्रीसूक्तपाठाख्येन श्रीमहालक्ष्मीश्वरि भगवती प्रीयताम् इति जलमुत्सृजेत् । ततः — तत्रस्थितान् आचार्यादीन् दक्षिणादिकं दत्वा प्रार्थयेत्- ॐ यत्पादपद्मामृतसेवनेन मूढोऽपि सद्यः प्रकरोति काव्यम् । साऽनेकदेवादिगणैः सपूज्या समस्तविघ्नक्षयमातनोतु ॥ प्रदक्षिणा त्रयं देवि प्रयत्नेन मया कृता । क्षम्यतां देव देवेशि पापानां क्षालनं कुरु ॥ प्रयच्छ पुत्रपौत्रांश्च. विष्णुवक्षः स्थलेऽनघे । श्रियं देहि यशो देहि सर्वान्कामान्प्रयच्छ मे ॥ धनं धान्यं धरां धर्मं कीर्तिमायुर्यशः श्रियम् । तुरगान् दन्तिनः पुत्रान् महालक्ष्मि प्रयच्छ मे । विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे तथाम्बरे । लक्ष्मि नित्या यथासि त्वं मयि नित्या तथा भव ॥ यन्मया वाञ्छितं देवि तत्सर्वं सफलं कुरु । न बाध्यन्तां कुकर्माणि संकटान्मे निवारय ॥ यावच्चन्द्रश्च सूर्यश्च यावद्येवा वसुन्धरा । तावन्मम गृहे देवि अचला सुस्थिरा भव । यावत्तारागणाकाशे यावदिन्द्रादयोऽमराः । तावन्मम गृहे देवि अचला सुस्थिरा भव । पङ्कजं देवि सन्त्यज्य मम वेश्मनि संविश । यथा सदारपुत्रोऽहं सुखीस्यां त्वत्प्रसादतः । भूमौ स्खलितपादानां भूमिरेवावलम्बनम् । त्वयि जातापराधानां त्वमेव शरणं शिवे ॥ अपराधो भवत्येव सेवकस्य पदे पदे । कोऽपरः क्षमते लोके केवलं मातरं विना ॥ साधु वाऽसाधु वा कर्म यद्यदाचरितं मया । तत्सर्वं कृपया

देवि गृहाणाराधनं मम ॥ ज्ञानतोऽज्ञानतो वापि यन्मयाचरितं शिवे। तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि ॥ ततः – आचार्याय सुवर्णम्, अन्नवस्त्रादिकम्, स्वर्णश्रृंगादियुतं गां संकल्पपूर्वकं दद्यात्। करिष्यामि व्रतं देवि त्वद्भक्तस्त्वत्परायणः। तदविघ्नेन मे यातु समाप्तिं त्वत्प्रसादतः॥ इति जलं देव्यग्रे भूमौ क्षिपेदिति।

उलूकपूजनम् :-

ॐ अग्नये कुटरूनालभते वनस्पतिम्ब्यऽउलूकानग्नीषोमाम्या-ञ्चाषानश्विभ्यां मयूरान्मित्रावरुणाम्याङ्कपोतान् ॥ ॐ वर्षाहूऋतूनामाखुः कशो मान्थालस्ते पितृणां बलायाजगरो वसूनां कपिञ्जलः कपोतऽ उलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः ॥ ॐ उलूकाय नमः उलूकं पूजयामि।

हस्तिपूजनम् :-

ॐ प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्त्तिका नीलं गोः क्रिमिः समुद्राय शिशुमारो हिमवते हस्ती ॥ ॐ हस्तिने नमः हस्तिनं पूजयामि।

कामदेवादिऋतुपूजनम् :-

उलूकाग्रे कामदेवं तरुणं वर्णं रक्तवस्त्राभरणमाल्यानुलेपनं वामदक्षिणयोरतिप्रीतिभ्यां शोभितं पुष्पवाणोक्षुधनुर्धरं वसन्तादिसहितं ध्यायेत् – ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूना रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥ ॐ कामदेवाय नमः कामदेवं पूजयामि। तद्वामेरतिं गौरवर्णां सर्वालङ्कारभूषितां रक्तवस्त्रपरीधानां पद्मद्वयकरां ध्यायेत् – ॐ इह रतिरिहरमध्वमिहधृतिरिहस्वधृतिः स्वाहा। उपसृजन्धरुणं मात्रे धरुणो मातरन्धयन्। रायस्पोषमस्मासुदीधरत्स्वाहा ॥ ॐ रत्यै नमः रतिं पूजयामि। कामस्य दक्षिणभागे प्रीतिश्यामव सर्वाभरणभूषितां रक्तवस्त्रपरीधानां तांबूलकरां ध्यायेत्-ॐ प्रेषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य। प्रयाजेभिरनुयाजान्व-षटकारेभिराहुतीः॥ ॐ प्रीत्यै नमः प्रीतिं पूजयामि। ततः कामदेवस्याग्रे वसन्तादिऋतून् पूजयेत् – ॐ वसन्तेनऽ ऋतुना देवा वसवस्त्रिवृता स्तुताः।

रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥ ॐ वसन्तऋतवे नमः वसन्तऋतुं पूजयामि । ॐ ग्रीष्मेणऽ ऋतुना देवा रुद्राः पञ्चदशे स्तुताः । बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः ॥ ॐ ग्रीष्मऋतवे नमः ग्रीष्मऋतुं पूजयामि । ॐ वर्षाभिऋतुना दित्या स्तोमे सप्तदशे स्तुताः । वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥ ॐ वर्षाऋतवे नमः वर्षाऋतुं पूजयामि । ॐ शारदेनऽ ऋतुना देवाऽ एकविꣳ शऽऋभवस्तुताः । वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयो दधुः ॥ ॐ शरदऋतवे नमः शरदऋतुं पूजयामि । ॐ हेमन्तेनऽ ऋतुना देवास्त्रिणवे मरुतस्तुताः । बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥ ॐ हेमन्तऋतवे नमः हेमन्तऋतुं पूजयामि । ॐ शैशिरेणऽ ऋतुना देवास्त्रयस्त्रिꣳ शे मृतास्तुताः । सत्येन रेवतीः क्षत्रꣳ हविरिन्द्र वयो दधुः ॥ ॐ शिशिरऋतवे नमः शिशिरऋतुं पूजयामि । इति लब्धोपचारैः संपूज्य पुष्पाञ्जलिं दद्यात् – ॐ वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदे वर्त्तिका हेमन्ताय ककराञ्छिशिराय विकंकरान् ॥ ततः – कामदेवस्य दिक्षु विदिक्षु च देवान् पूजयेत् – पञ्चवर्णैः चन्दने वा अष्टदलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वर्तुलत्रयं तद्बहिर्वृत्तं चतुरस्रं कृत्वा ॐ [१] भस्मशरीराय नमः भस्मशरीरं पूजयामि । ॐ अनङ्गाय[२] नमः अनङ्गं पूजयामि । ॐ मन्मथाय[३] नमः मन्मथं पूजयामि । ॐ वसन्त[४]सखाय नमः वसन्तसखं पूजयामि । ॐ स्मराय[५] नमः स्मरं

---

(१) ॐ सँज्ञानमसि कामधरणम्मयि ते कामधरणं भूयात् । अग्नेर्भस्म्मास्यग्नेः पुरीषमसि चितस्स्थपरिचितऽऊर्ध्वचितः श्रयध्वम् ॥

(२) ॐ अङ्गान्यात्व मन्भिंषजातदश्विनात्त्मानमङ्गैः समधात्सरस्वती । इन्द्रस्य रूपꣳ शतमानमायुश्चन्द्रेण ज्ज्योतिरमृतन्दधानाः ॥

(३) ॐ अग्नेर्जनित्रमसि वृषणौस्थऽउर्वश्यस्यायुरसि पुरूरवाऽअसि । गायत्रेण त्वा च्छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा च्छन्दसा मन्थामि ॥

(४) ॐ अश्मन्वतीरीयते सꣳ रमध्वमुत्तिष्ठत प्रतरता सखायः । अत्राजहीमो शिवा येऽअसञ्छिवन्वयमुत्तरेमाभिवाजान् ॥

(५) ॐ सन्धये जारङ्गेहायोपपतिमार्त्यै परिवित्तन्निर्ऋत्यै परिविविदानमराध्याऽ एदिधिषुः पतिन्निष्कृत्यै पेशस्कारी सञ्ज्ञानायस्मरकारीम्प्रकामोद्यायोपसदं वर्णायानुरुधम्बलायोपदाम् ॥

पूजयामि । ॐ [१]इषुचापाय नमः इषुचापं पूजयामि । ॐ [२] पुष्पास्त्राय नमः पुष्पास्त्रं पूजयामि । ॐ [३] कन्दर्पाय नमः कन्दर्पं पूजयामि । इति लब्धोपचारैः संपूज्य ॐ कामदेवाय विद्महे पुष्पवाणाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् ॥ नमोऽस्तु पुष्पवाणाय जगदानन्दकारिणे । मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय च ॥ इति नतिं कुर्यात् ।

कुमारीपूजा[४] :-

अद्य श्रीलक्ष्मीपूजनसाङ्गतासिद्धये कुमारीपूजनं करिष्ये-इति सङ्कल्प्य- ॐ नृत्ताय सूतङ्गीताय शैलूषन्धर्माय सभाचरन्नरिष्ठायै भीमलन्नर्माय रेभठं॰ हसाय कारिमानन्दाय स्त्रीषखम्प्रमदे कुमारी पुत्रं मेधायै रथकारन्धैर्याय तक्षाणम् ॥ ॐ कन्याऽइव वहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि । यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽअभितत्पवन्ते ॥ ॐ मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् । नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ ॐ कुमार्यै नमः कुमारीं पूजयामि ।

बटुकपूजा :-

अद्य श्रीलक्ष्मीपूजनकर्मणि साङ्गफलप्राप्तये बटुकपूजनं करिष्ये — इति सङ्कल्प्य ॐ अनुते शुष्मन्तुरन्तमीयतुः क्षोणी शिशुन्नमातरा । विश्वास्ते स्पृधः

---

(१) ॐ तपसे कौलालम्मायायै कर्माठं॰ रूपाय मणिकारठं॰ शुभे वपठं॰ शरव्यायाऽइषुकारठं॰ हेत्यै धनुष्कारङ्कर्म्मणो ज्याकारन्दिष्टाय रज्जुसर्ज्जम्मृत्यवे मृगयुमन्तकाय श्वनिनम् ।

(२) ॐ ओषधयः प्रति गृब्भ्णीत पुष्पवतीः सुपिप्पलाः । अयं वो गर्भऽऋत्वियः प्रत्क्नठं॰ सधस्त्थमासदत् ॥

(३) ॐ प्रथमा द्वितीयैर्दितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भियजू षि सामभिः सामान्युग्भिर्ऋचः पुरोनुवाक्याभिः पुरोनुवाक्या याज्याभिर्याज्या वषट्कारैर्वषट्काराऽआहुतिभिराहुतयो मे कामान्त्समर्ध्दयन्तु भूः स्वाहा ॥

(४) मधुरं भोजनं देयं शर्कराघृतसंयुतम् । दश वा सप्त वा चाथ पञ्च वा तिस्त्र एव च ॥ एकाप्यशक्तेन तथा कन्या भोज्या सुवासिनी । यथाशक्त्या च तासां वै दद्यात्कञ्चुकवाससी ॥ अलङ्कारादिकं चैव सुमनो मालिकाः शुभाः । यथाशक्त्याथवा कुर्यात्सर्वमेतध्दि पूजनम् ॥

श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ ॐ बटुकाय नमः बटुकं पूजयामीत्यावाहनादिराजोपचारैः संपूजयेत् ।

सुवासिनीपूजा :–

ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मेदाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दाः । सुखदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मेदाऽ आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मेदाः । विधृतिरुपरिष्टाद् वृहस्पतेराधिपत्यऽओजो मेदा विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि । ॐ या देवि सर्वभूतेषु लक्ष्मीरूपेण संस्थिता । नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ इति संपूज्य- ॐ बालायै नमः । ॐ कामेश्वर्यै नमः । ॐ गणेश्यै नमः । ॐ दुर्गायै नमः । ॐ लक्ष्म्यै नमः । ॐ सरस्वत्यै नमः । ॐ कलाभ्यो नमः । इतिदेवीरूपां ध्यात्वा वस्त्रालङ्कारादि समर्प्य प्रार्थयेत्- बन्धूकपुष्पसंकाशे त्रिपुरे भयनाशिनी । भाग्योदयसमुत्पन्ने प्रसन्नवरदेति वै । जय देवि जगद्धात्रि त्रिपुरे च त्रिदैवते । भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तु ते ॥ जगत्पूज्ये जगद्वन्द्ये जगन्मोहनविधायिनि । सर्वविघ्नहरे देवि महालक्ष्मि नमोऽस्तु ते ॥

निधिपूजनम् :–

ॐ धन्वनागा धन्वनाजिञ्जयेम धन्वना तीव्राः समदो जयेम । धनुः शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ ॐ रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु । ऋतस्य पथाप्रेत चन्द्रदक्षिणा विस्वः पश्य व्यन्तरिक्षं यतस्व सदस्यैः ॥ ॐ स्वर्णघर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्ण शुक्रः स्वाहा स्वर्ण ज्योतिः स्वाहा स्वर्ण सूर्यः स्वाहा ॥ इति निधिं पूजयेत् । अथवा — ॐ कुबेराय नमः इति नाममन्त्रेण संपूज्य प्रार्थयेत् — ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च । भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः ॥ ततः षोडशसंख्याकान् गोधूमनिर्मितान् सघृतादिसहितान् अपूपान्[१] षोडशलड्डुकान् षोडशऋतुफलानि नानापक्वापक्वसाकादीनि दक्षिणां च श्रीमहालक्ष्मीपूजायाः सद्गुण्यार्थमिदमाचार्याय दास्ये-इति संकल्प्य ॐ इन्दिराप्रतिगृह्णाति इन्दिरा वै ददाति च । इन्दिरातारकोभाभ्यामिन्दिरायै नमो नमः ॥ इति पठित्वा ददेत् ।

(१) दद्यात्तु षोडशापूपान् गोधूमानां द्विजातये ।

चरणोदकपानम् :-

ततस्तच्चरणोदकं पात्रान्तरे गृहीत्वा पिबेत्- ॐ गङ्गापुष्करनर्मदा च यमुनागोदावरीगोमतीगङ्गाद्वारगयाप्रयागबदरीवाराणसीसिन्धुषु। रेवासेतु सरस्वतीप्रभृतिषु ब्रह्माण्डभाण्डोदरे तीर्थस्नानसहस्रकोटिफलदं श्रीमूर्तिपादो[1]दकम् ॐ महाल्क्ष्म्यै नमः चरणोदकं पिबामि। ततः॥ ॐ तां मऽ आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान्विन्देयं पुरुषानहम्॥ इति मन्त्रेण पूजितपुष्पमालां गृहीत्वा नासिकायाम् आघ्राय स्वहृदि मस्तके धारयेत्। ततः – 'अनेन यथाशक्त्यर्चनप्रकारेण श्रीमहालक्ष्मीः प्रीयताम्' इति भूमौ पात्रान्तरे वा जलं क्षिपेदिति। अर्चितपुष्पाक्षतजलादिकं तु तुलस्यादौ प्रतिदिनं क्षिपेदिति सम्प्रदायः।

ब्राह्मणकर्तृकाशीर्वाद :-

ॐ भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु। रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्वदा॥ स्तुवन्तु ब्राह्मणा नित्यं दारिद्रयं न च बाधते। सर्वपापहरालक्ष्मीः सर्वसिध्दिप्रदायिनी॥ श्रीर्वर्चस्वमायुष्यमारोग्यमा-विधात्पवमानं महीपते। धनं धान्यं पशु बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥ त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः। स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समस्नुते दिवीति दिवीति॥ ततः सति संभवे उत्सवं[2] पुराणादिकथां च कुर्वन् सन् रात्रौ जागरणं कुर्याद् बन्धुभिः सह। प्रभाते ब्राह्मणादिभोजयेत्[3]।

---

(१) स्वयं देवस्य वहनं काष्ठपात्रे च पूजनम्। स्थापनं मृत्तिकापात्रे त्रयं दारिद्र्यकारणम्॥ हस्ते वैदले कांस्ये शङ्खे च रीतिसंभवे। तृणे च नेत्रपात्रे च त्वचि रौप्ये न चार्चयेत्॥

(२) महान्तमुत्सवं कुर्याद् भवने बन्धुभिः सह।

(३) ब्राह्मणान्भोजयेत्पश्चाद्दीनान्धकृपणैः सह। तदा कृतार्थमात्मानं मन्यते मनुजोत्तमः॥ भोजयेत्साङ्गवेदज्ञान्स्वादुभिर्भोज्यवस्तुभिः। विततं च यथाशीर्भिरभीष्टफलदं भवेत्॥ ब्राह्मणानां ततः पूजा कार्या वित्तानुसारत। यावद्विप्रा न पूज्यन्ते न तावत्पूर्णतां व्रजेत्॥ पूजितेषु तु विप्रेषु सर्वं संपूर्णतां व्रजेत्॥

अथ होमादिविसर्जनान्तकर्म[१] :-

यजमानादयः सर्वे यथास्थानमुपविश्याचम्य प्राणानायम्य शान्तिसूक्तं पठित्वा यजमानो देशकालौ सङ्कीर्त्य-गोत्रः, शर्मा अस्मिन् सनवग्रहमखहवनात्मकमहालक्ष्मीयागकर्मणि[२] गणेशाम्बिकयोः, वरुणस्य, सगणपानां षोडशमातृणां, सप्तमातृणां, वास्तुपीठस्थदेवानां, मण्डपदेवतानां, सर्वतोभद्रपीठस्थदेवतानां, प्रधानस्य सपरिवारस्य मेखलादेवानामग्नेः शान्तिकलशदेवस्य, नवग्रहाणां सपरिवाराणां, योगिनीनां, क्षेत्रपालानामाचार्यदित्रऋत्विजां च पूजनं करिष्ये इति सङ्कल्प्य सर्व विधिवतकृत्वा यजमानः अग्न्यायतनस्य[३] चतुर्दिक्षु ब्राह्मणोपवेशनं कारयित्वा स्वयमपि पश्चिमदिशि उपविश्य गणपतिं स्मृत्वा ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने। तिष्ठ देवि शिखामध्ये चामुण्डे चापराजिते ॥ इति मन्त्रेण शिखाग्रन्थिबन्धनं कुर्यात्। ततः –

ॐ सहस्राणि सहस्रसो बाहवोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि ॥ इति मन्त्रेण महीं प्रार्थयेत्। ततः – ॐ यऽएतावन्तश्च भूयाँ्सश्च दिशो रुद्रा वितस्थिरे। तेषाँ् सहस्रयोजने वधन्वा नितन्मसि ॥ इत्यासनोपरि उपवेशयेत्।

---

(१) आवाहयामि तत्कुण्डं विश्वकर्म विनिर्मितम्। शरीरं यच्च ते दिव्यमग्न्यधिष्ठानमद्भुतम् ॥ ये च कुण्डे स्थिता देवाः कुण्डाग्रे याश्च देवताः। ऋद्धिं यच्छन्तु ते सर्वे यक्षसिद्धिं मुदान्विताः ॥ हे कुण्ड तव निर्माणं कृतं वै विश्वकर्मणा। अस्माकं वाञ्छितासिद्धिं यक्षसिद्धिं ददातु भो।

कुण्डे विश्वकर्मापूजा – ॐ विश्वकर्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम्। तस्मै विशः समनमन्तपूर्वीरयमुग्रो विहव्यो यथा सत्। उपयामगृहीतोसीन्द्रायत्वा विश्वकर्मणऽ एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥ अज्ञानात् ज्ञानतो वापि दोषाः स्युः खननोद्भवाः। नाशय त्वं हि तान्सर्वान्विश्वकर्मन्नमोस्तु ते ॥

(२) द्रवं स्रुवेण होतव्यं पाणिना कठिनं हविः। शत्त्यभावे घृतादीनां पूर्वमानार्धमेव च ॥ घृतं पञ्चामृतादीनां यन्मानन्नं समुदीरितम्। शक्त्यभावे तदर्धं वा समुद्दिष्टं मनीषिभीः ॥ आयुःक्षयो यवाधिक्ये यवसाम्ये धनक्षयः। सर्वकामसमृद्धिः स्यात्तिलाधिक्ये न संशयः।

(३) होममध्ये यदा कश्चिज्जीवाग्नौ तु विपद्यते। तदा देयाग्नये स्वाहा प्रायश्चित्तमिदं स्मृतम्। यद्वा हुत्वा त्वनादिष्टं होमशेषं समापयेत् ॥

ततः — ॐ अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु रथन्तरꣳ साम त्रिवृत्स्तोमो वसन्तऽऋतुर्ब्रह्मद्रविणम् ॥ ॐ पूर्वायै नमः। ॐ दक्षिणामारोह त्रिष्टुप्त्वावतु बृहत्साम पञ्चदशस्तोमो ग्रीष्मऽऋतुः क्षत्रन्द्रविणम् ॥ ॐ दक्षिणायै नमः। ॐ प्रतीचीमारोह जगती त्वावतु वैरूपꣳ साम सप्तदशस्तोमो वर्षाऽऋतुर्विड्द्रविणम् ॥ ॐ पश्चिमायै नमः। ॐ उदीचीमारोहानुष्टप्त्वावतु वैराजꣳ सामैकविꣳशस्तोमः शरद् ऋतुः फलन्द्रविणम् ॥ ॐ उत्तरायै नमः। ततः —

ॐ अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया॥ उपक्रामन्तु भूतानि पिशाचा सर्वतोदिशम्। सर्वेषामविरोधेन हवनं च समारभे॥। ॐ ये भूतानामधिपतयो विशिखासः कपर्दिनः। तेषाँ सहस्रयोजने वधन्वा नितन्मसि॥ इति मन्त्रेण दिग्बन्धनं कृत्वा ग्रहहवनं समाप्य तद्दिने द्वितीयदिने वा प्रधानन्यासं कुर्यात्। तत्रादौ ध्यायेत् — ॐ त्वं परा प्रकृतिः साक्षाद् ब्रह्मणः परमात्मनः। त्वत्तो जातं जगत्सर्वं त्वं जगज्जननी शिवे॥ महदाद्यणुपर्यन्तं यदेतत्सचराचरम्। त्वयैवोत्पादितं भद्रे त्वदधीनमिदं जगत्॥ त्वमाद्या सर्वविद्यानामस्माकमपि जन्मभूः। त्वं जानासि जगत्सर्वं न त्वां जानासि कश्चन॥ त्वं काली तारिणी दुर्गा षोडशी भुवनेश्वरी। धूमावती त्वं बगला भैरवी छिन्नमस्तका॥ त्वमन्नपूर्णा वाग्देवी त्वं देवी कमलालया। सर्वशक्तिस्वरूपा त्वं सर्वदेवमयी तनुः॥ त्वमेव सूक्ष्मा स्थूला त्वं व्यक्ताव्यक्तस्वरूपिणी। निराकारापि साकारा कस्त्वां वेदितुमर्हति॥ उपासकानां कार्यार्थं श्रेयसे जगतामपि। दानवानां विनाशाय धत्से नानाविधास्तनूः॥ चतुर्भुजा त्वं द्विभुजा षडभुजाऽष्टभुजा तथा। तमेव विश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥ ततः- ॐ महालक्ष्म्यै नमः। अंगुष्ठाभ्यां नमः। ॐ विष्णुवामाङ्कसंस्थितायै नमः। तर्जनीभ्यां नमः। ॐ सौभाग्यजनन्यै नमः- मध्यमाभ्यां नमः। ॐ सुखदायै नमः- अनामिकाभ्यां नमः। ॐ सौभाग्यकर्त्र्यै नमः- कनिष्ठिकाभ्यां नमः। ॐ समस्तभूतान्तरसंस्थितायै नमः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासः। ततः- 'हिरण्यवर्णाम्' इति

लक्ष्मीसूक्तेन पूर्वोक्तन्यासद्वयं कृत्वा ध्यायेत[१] — ॐ अरुणकमलसंस्था तद्रजः पुञ्जवर्णा कमलधृतेष्टाभीतियुग्मांबुजा च। मणिमुकुटविचित्रालंकृतिः पद्ममाला भवतु भुवनमाता सन्ततं श्रीः श्रियै नः॥ ततः प्रधानहोमः[२]। आवरणादिस्थापितदेवानां होमः। सतिसंभवे लक्ष्मीसहस्रमन्त्रैनोमहोर्मः। ततः प्रार्थयेत्- ॐ सरसिजनिलये सरोजहस्ते धवलान्तर्गतशुभगन्धमाल्यशोभे। भगवति हरि वल्लभे मनोज्ञे त्रिभुवनभूतिकरे प्रसीद मह्यम्॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः। धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा। सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्॥ पद्मानने पद्मउरु पद्माक्षीपद्मसंभवे। तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम्॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्। विष्णुप्रियसखीं देवीं नमाम्यच्युतवल्लभाम्॥ महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो

---

(१) ॐ मातर्नमिमि कमले कमलायताक्षि श्रीविष्णुहृत्कमलवासिनि विश्वमातः। क्षीरोदजे कोमलगर्भगौरिलक्ष्मी प्रसीद सततं नमतां शरण्ये॥ ॐ वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां हस्ताभ्यामभयप्रदां मणिगणैर्नानाविधैर्भूषिताम्। भक्ताभीष्टफलप्रदा हरिहरब्रह्मादिभिस्सेवितां पार्श्वे पङ्कजशङ्खपद्मनिधिभिर्युक्तां सदा शक्तिभिः॥

ॐ कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः हस्तात्क्षिप्तहिरण्मया-मृतघटैरासिच्यमानां श्रियम्। बिभ्राणां वरमव्जयुग्ममभयं हस्तैः किरीटोज्वलां क्षौमाबध्दनितम्बबिम्बललितां वन्दे रविन्दस्थिताम्।

(२) एकसाहस्त्रिको होमः पुत्राद्यावाप्तिकाम्यया। दश साहस्त्रिको होमः श्रीकामः शुद्धमानसः॥ अयुतं शतकृत्वस्तु जुहुयात्तिलसर्पिषा। अनन्तामव्यच्छिन्नां शाश्वतीं विन्दते श्रियम्॥ अशक्तौ- जप एवोत्को दशसाहस्त्रिको वरः। जप्त्वा तु प्रयुतं सभ्यगनन्तां विन्दते श्रियम्। अयुतं शतकृत्वस्तु जप्त्वा सर्वमुपाश्नते। विष्णुधर्मोत्तरे- श्रीसूक्तं यो जपेद् भक्त्या तस्यालक्ष्मीर्विनश्यति। जुहुयाद्यश्च धर्मज्ञो हविष्येण विशेषतः॥ श्रीसूक्तेन तु पद्मानां घृताक्तानां भृगूत्तम। अयुतं होमयेद्यस्तु वह्नौ भक्तियुतो नरः। दशायुतं तु पद्मानां जुहुयाद्यस्तथा जले। मापैति तत्कुलाल्लक्ष्मीर्विष्णोर्वक्षगता यथा॥ घृताक्तानां तु बिल्वानां हुत्वा रामायुतं तथा। बहुवित्तमवाप्नोति स यावन्मनसेच्छति॥ बिल्वानां लक्षहोमेन कुले लक्ष्मीमुपाश्नुते। पद्मानामथ बिल्वानां कोटिहोमं समाचरेत्॥ सत्यलोकमवाप्नोति देवेन्द्रमपि च ध्रुवम्।'

लक्ष्मीः प्रचोदयात् ॥ पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि । विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥ आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः । ऋषयः श्रियपुत्राश्च मयि श्रीर्देवीदेवता ॥ ऋणरोगादिदारिद्रयं पापञ्च अपमृत्यवः । भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥ तत उत्तरपूजनादारभ्य बलिदानादि कर्म कृत्वा पुष्पपूरिताञ्जलिनिविष्टं भावयन् तत्तत्पूजामन्त्रैः तत्तदावरणपूजां देव्या वामहस्ते पूजासमर्पणं च विभाव्य आवरणानि च विभाव्य देवीपादमूले स्थितजीवात्मनां सहितां श्रीदेवीं नीत्वा स्वञ्जलिगतकुसुमैस्तत्र तां सम्पूज्य पञ्चोपचारचन्दनाद्युपचारान् श्रीदेव्यै समर्पितान् स्मारं स्मारं पञ्चोपचारमुद्राश्च प्रदर्शिता भावयेत् । ततो देव्या नासायाम् गन्धदेवता, श्रोत्रे पुष्पदेवता, नाभौ धूपदेवता, नयने दीपदेवता, जिह्वायाम् नैवेद्यदेवता इति क्रमेण विलीनाः विभाव्य मूलमन्त्रमुच्चरन् क्षणं न किञ्चिदपि चिन्तयेत् । ततः- अभिषेकादिविसर्जनान्तं कृत्वा सुहृदादियुतो भुञ्जीतेति शिवम् ।

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः

अथ श्रीसूक्तम्

हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥१ ॥

हे शास्त्रों को प्रकट करनेवाले वह्निदेव, तप्तसुवर्ण के समान दीप्तिमती, हरितवर्णा (अथवा मृगीरूपधारण करनेवाली) स्वर्णमय एवं रौप्यमय पुष्पों की माला पहिनी हुई, चन्द्रमा की तरह जगत् को आल्हादित करनेवाली, सुवर्णादि द्रव्यों से ही जिसकी सत्ता प्रकट होती है, ऐसी लक्ष्मी का मेरे लिए आह्वान कीजिए ॥१ ॥

तां मऽआवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२ ॥

हे जातवेदः, उस अनपायिनी लक्ष्मी को मेरे लिए बुलाइये जिसके मेरे पास आ जानेपर मैं सुवर्णादि द्रव्य, गौ आदि पशु, अश्व आदि वाहन एवं पुत्र, मित्र, दास आदि पुरुषों से सम्पन्न हो जाऊँ ॥२ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥३॥

जिसके अग्रभाग में अश्व और मध्यभाग में रथ हों तथा जो अपने हाथियों की चिंघाड़ से सब को जागृत कर देती है, ऐसी सेना रूपा लक्ष्मी का मैं आवाहन करता हूं, वही प्रकाशरूपा लक्ष्मी मुझ से प्रीति करे अर्थात् मेरे पास स्थिर रहे॥३॥

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं।
पद्मे स्थिताम् पद्मवर्णाम् तामिहोपह्वये श्रियम्॥४॥

जो भगवती लक्ष्मी 'ब्रह्म' रूपा है, श्रेष्ठ स्मित से युक्त सुवर्ण के आवरणवाली, शीतल स्वभाववाली, ज्योतिः स्वरूपा है स्वयं तृप्त हुई अपने भक्तों के मनोरथ पूर्ण कर उन्हें भी तृप्त करती है, कमल में स्थित है, और कमल तुल्य मनोहर वर्णवाली है ऐसी देवी लक्ष्मी का यहाँ आवाहन करता हूँ॥४॥

चन्द्रां प्रभासां यशसां ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणं प्रपद्ये अलक्ष्मीमे नश्यतां त्वां वृणोमि॥५॥

चन्द्रमा की तरह आह्लादिनी, कान्तिमती, लोक में अपनी कीर्ति से प्रकाशमान, देवताओं से सेवित, उदारप्रकृतिवाली, कमलतुल्य आकृतिवाली, ईकार से वाच्य उस लक्ष्मी की शरण में प्राप्त होता हूँ जिससे मेरी दरिद्रता का नाश हो और मैं लक्ष्मीयुक्त हो जाऊँ॥५॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्याऽअलक्ष्मीः॥६॥

हे सूर्य के समान वर्णवाली श्री, तपस्या से ही तुम्हारे हाथ से यह मङ्गलमय बिल्व नाम का वनस्पति वृक्ष प्रकट हुआ अतः तुम्हारी कृपा से इस वृक्ष के फल मेरे अन्तरिन्द्रिय सम्बन्धी अज्ञान और बहिरिन्द्रय सम्बन्धी अलक्ष्मी का निवारण करें॥६॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृध्दिं ददातु मे॥७॥

हे श्रीः, मुझे महादेवजी के मित्र धनाध्यक्ष कुबेर कीर्ति और चिन्तामणि मन्त्र सहित प्राप्त हो, मैं इस राष्ट्र में उत्पन्न हुआ हूँ वह देवसखा कुबेर मुझे कीर्ति और समृध्दि प्रदान करे ॥७ ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृध्दिञ्च सर्वां निर्णुद मे गृहात्॥ ८॥

हे अग्ने, भूख प्यास से मलिन हुई, लक्ष्मी की अग्रजा अलक्ष्मी को मैं नष्ट करता हूँ। हे लक्ष्मीः, मेरे घर से सब प्रकार की अभूति और असमृध्दि को दूर करो ॥ ८ ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥९ ॥

हे अग्ने, गन्ध के द्वारा जिसका बोध होता है, जिसका कोई घर्षण (अपमान) नहीं कर सकता. जो धान्यादि से सर्वदा पुष्ट है, जिसमें प्रचुर मात्रा में करीष (सूखा गोबर, इस विशेषता से पशुओं की समृद्धि द्योतित होती है) प्राप्त होता है, सब प्राणियों के एकमात्र निग्रहानुग्रह में समर्थ उस (पृथ्वीरूपा) लक्ष्मी का मैं यहाँ आवाहन करता हूँ ॥६ ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥१० ॥

हे श्रीः, हमारे मनोरथ और चेष्टाएँ पूर्ण हों, वाणी यथार्थ वादिनी हो, दूध आदि के लिए विविध पशु और भोजन के लिए पर्याप्त अन्न हमें प्राप्त हो, आपके उपासक मुझ को सम्पत्ति और यश दोनों मिले ॥१० ॥

कर्दमेन प्रजाभूता मयि संभव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥११ ॥

कर्दमरूप पुत्र से ही लक्ष्मी पुत्रवती है अतः हे कर्दम, आप मुझमें भी पुत्ररूप से उत्पन्न हों, क्योंकि आपके आने से पुत्रस्नेह के कारण लक्ष्मी भी आ जायेगी। इसलिये पद्ममालिनी माता लक्ष्मी का निवास मेरे वंश में कराइये। अथवा कर्दम ऋषि से यह सारी प्रजा उत्पन्न हुई है अतः हे कर्दम, आप मुझसे भी पुत्ररूप से उत्पन्न हों ॥११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥

जलाभिमानी देवता मेरे लिये स्नेहयुक्त पदार्थों को उत्पन्न करें। हे चिल्कीत, (लक्ष्मीपुत्र) आप मेरे घर में वास कीजिए और माता लक्ष्मी को भी मेरे कुल में निवास कराइये क्योंकि आप के आने से पुत्र स्नेहयुता वह स्वयं मेरे यहाँ निवास करेंगी ॥१२॥

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽ आवह ॥१३॥

हे अग्ने, स्नेहमयी अथवा प्रचुर गन्धवाली, जगत् को पुष्ट करनेवाली यद्वा अभिषेक के लिए तत्पर हुए दिग्गजों के पुष्कर (शुण्डाग्र) वाली एवं स्वयं पुष्टिस्वरूपा पिङ्गलवाली, कमलों की माला धारण की हुई सबको आल्हादित करनेवाली, स्वर्णमयी उस लक्ष्मी का मेरे लिए आवाहन कीजिए ॥१३॥

आर्द्रां यष्करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो मऽ आवह ॥१४॥

हे अग्ने, उस स्नेहमयी,यशस्करिणी अथवा जगत की रक्षा के लिए दण्ड ग्रहण की हुई पूजनीय स्वरूपवाली या स्वयं धर्मदण्डस्वरूपा, सुन्दरवर्ण से युक्त, स्वर्णमयमालाधारिणी, ऐश्वर्यरूपा अथवा प्रसरण शीला, स्वर्णमयी, लक्ष्मी को मेरे लिए आवाहन कीजिए ॥१४॥

तां मऽ आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५॥

हे अग्ने, सर्वदा स्थिर रहनेवाली उस लक्ष्मी को मेरे पास बुलाइये जिसके आनेपर मुझे प्रचुर सुवर्ण, गायें, दासियाँ, घोडे और सेवक प्राप्त हों ॥१५॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१६॥

जो व्यक्ति लक्ष्मी की कामना करता हो वह पवित्र और संयमी होकर प्रतिदिन घृत से हवन करे और श्रीसूक्त की पन्द्रह ऋचाओं का निरन्तर पाठ करे,

या पन्द्रह बार श्रीसूक्त का अखण्डपारायण कर फिर प्रत्येक ऋचा का विधिपूर्वक यथा संख्या जप करे। यदि इतना न कर सके तो बिना अग्निहोत्र के भी लौकिक अर्थात् सामान्यरूप से गृह में स्थित अग्नि में श्रीसूक्त की १५ ऋचाओं से १५ आहुति देकर हवन करे और फिर १५ बार श्रीसूक्त का जप करे तो उस श्रीकाम पुरुष को इसी जन्म में लक्ष्मी प्राप्ति अवश्य हो जाती है, यह निश्चय है ॥१६॥

भगवती महालक्ष्मी के यथालब्धोपचार-पूजन के अनन्तर महालक्ष्मीपूजन के अङ्ग-रूप श्री देहली विनायक, मसिपात्र (दवात) लेखनी, सरस्वती कुबेर तुला-मान तथा दीपकों की पूजा की जाती है सर्वप्रथम देहली विनायक की पूजा।

देहली विनायक पूजन :-

व्यापारिक प्रतिष्ठानादि में दीवारों पर "ॐ श्री गणेशाय नमः" "स्वास्तिक चिह्न" "शुभलाभ" आदि मांगलिक एवं कल्याणकर सिन्दूरादि से लिखे जाते हैं इन्हीं शब्दों पर "ॐ देहली विनायकाय नमः" इस नाम मन्त्र द्वारा गन्ध-पुष्पादि से पूजन करे॥

श्री महाकाली (दवात) पूजन :-

स्याही-युक्त दावात को भगवती महालक्ष्मी के सामने पुष्प तथा अक्षत पुञ्ज (ढेरी) में रखकर उसमें सिन्दूर से स्वस्तिक बना दे तथा मौली लपेट दे। "ॐ महाकाल्यै नमः" इस मन्त्र से गन्ध पुष्पादि पञ्चोपचार या षोडशोपचार से दवात में भगवती महाकाली का पूजन करे और अन्त में इस प्रकार ध्यान, प्रार्थना पूर्वक उन्हे प्रणाम करें।

ध्यानम् :-

ॐ मषित्वं लेखनी युक्ता चित्रगुप्ताशयस्थिता।
सदक्षराणां पत्रे च लेख्यं कुरुसदामम॥
या माया प्रकृतिः शक्तिश्चण्ड मुण्डविमर्दिनी।
सा पूज्या सर्वदेवैश्च ह्यस्माकं वरदा भव॥
सद्यश्छिन्न-शिरः. कृपाणमभयंहस्तैर्वरं बिभ्रतीं।
घोरास्यां शिरसां स्रजं सुरुचिरामुन्मुक्त-केशावलीम्॥

सृक्कासृक्-प्रवहांश्मशान निलयांश्रुत्योः शवालंकृतिं ।
श्यामाङ्गीं कृत मेखलां शव-करैर्देवीं भजे कालिकाम ।।

आवाहन :-

भगवती काली का ध्यान करने के बाद, लेखनी दवात के सम्मुख आवाहन मुद्रा दिखाकर, निम्न मन्त्र पढते हुए उनका आवाहन करे –

ॐ देवेशि ! भक्ति सुलभे ! परिवार – समन्विते ।
यावत् त्वां पूजायिष्यामि तावत् त्वं सुस्थिराभव ।।
दुष्पारे घोर संसार-सागरे पतितम् सदा ।
त्रायस्व वरदे देवि ! नमस्ते चित् परात्मिके ।।
ये देवा, याश्च देव्यश्च चलितायां चलन्ति हि ।
आवाहयामि तान् सर्वान् कालिके परमेश्वरि ।।
प्राणान् रक्ष, यशोरक्ष, रक्ष वारान्, सुतान, धनम् ।
सर्वं रक्षा करो यस्मात् त्वं हि देवि, जगन्मये ।
प्रविश्य तिष्ठ यज्ञेऽस्मिन् यावत पूजां करोम्यहम ।
सर्वानन्द करे देविः । सर्व-सिद्धिं प्रयच्छ में ।।
तिष्ठात्र कालिके मातः । सर्व कल्याण – हेतवे ।
पूजाम् ग्रहाण सुमुखि नमस्ते-शङ्कर – प्रिये ।।

आवाहन करने के बाद निम्न मन्त्र पढ़कर उनके आसन के लिये पांच पुष्प अञ्जलि में लेकर अपने सामने छोड़े । नाना-रत्न समायुक्त, कार्त-स्वर-विभूषितम् । आसनं देव-देवेशि ! प्रीत्यर्थं प्रति गृह्यताम् ।। श्री महाकाली देव्यै आसनार्थे पञ्च पुष्पाणि समर्पयामि ।। भगवती श्री काली के आसन के लिये पांच पुष्प अर्पित करे । फिर चन्दन-अक्षत-पुष्प धूप दीप नैवेद्य से निम्न मन्त्रों से पूजन करें ।

ॐ श्री काली देव्यै नमः पादयोः पाद्यं समर्पयामि ।
ॐ श्री काली देव्यै नमः शिरसि अर्घ्यं समर्पयामि ।
ॐ श्री काली देव्यै नमः गंधाक्षतं समर्पयामि ।

ॐ श्री काली देव्यै नमः पुष्पं समर्पयामि।
ॐ श्री काली देव्यै नमः धूपं आघ्रापयामि।
ॐ श्री काली देव्यै नमः दीपं दर्शयामि।
ॐ श्री काली देव्यै नमः नैवेद्यं निवेदयामि।
ॐ श्री काली देव्यै नमः आचमनीयं समर्पयामि।
ॐ श्री काली देव्यै नमः ताम्बूलं समर्पयामि।

इस प्रकार पूजन करने के बाद बाँएं हाथ में गन्ध, अक्षत, पुष्प लेकर दाहिने हाथ द्वारा मन्त्र पढ़ते हुए लेखनी दवात पर छोड़े। ॐ महाकाल्यै नमः अनेन श्री कालीदेवीं प्रीयताम् नमो नमः।

पूजन कर नीचे लिखी प्रार्थना करे।

कालिके! त्वं जगन्मातर्मसिरूपेण वर्त से।
उत्पन्ना त्वं च लोकानां व्यवहार प्रसिद्धये॥
या कालिका रोगहरा सुवन्द्या।
भक्तैः समस्तै र्व्यवहार दक्षैः जनैर्जनानां भयहारणी च
सा लोकमाता मम सौख्यदास्तु॥

लेखनी-पूजन :—

लेखनी (कलम) पर मोली बान्ध कर नीचे लिखा ध्यान करके पूजन करे।

ॐ शुक्लां ब्रह्म विचार सार परमामाद्यां जगद्व्यापिनीं।
वीणा पुस्तक धारणीमभयदां जाड्यान्धकारापहाम॥
हस्ते स्फाटिक मालिकां विदधतीं पद्मासने संस्थितां।
वन्देतां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम॥
लेखनी निर्मिता पूर्वं ब्रह्मणा परमेष्ठिना।
लोकानां च हितार्थाय स्मातां पूजयाम्यहम्॥
या कुन्देन्दु-तुषार-हारधवला, या शुभ्र वस्त्रावृता।
या वीणा वर दण्ड मण्डित करा या श्वेत पद्मासना॥

या ब्रह्माऽच्युत शङ्कर प्रभृति भिर्देवैः सदा वन्दिता ।
सा मां पातु सरस्वती भगवती निःशेष जाड्यापहा ॥

सरस्वती (पञ्जिका-वही-खाता) पूजनम् –

पञ्जिका – बही बसना, तथा थैली में रोली या केशर युक्त चन्दन से स्वस्तिक-चिह्न बनाये तथा थैली में पांच हल्दी की गांठ, धनिया, कमल गट्टा अक्षत दूर्वा और द्रव्य रखकर उसमें सरस्वती का पूजन करे – **ध्यान् करे** ।

या कुन्देन्दु तुषार हार धवला या शुभ्र वस्त्रावृता ।
या वीणा वर दण्ड मण्डित करा या श्वेत पद्मासना ॥
या ब्रह्माच्युत शङ्कर प्रभृति भिर्देवैः सदा वन्दिता ।
सा मां पातु सरस्वती भगवती निः शेष जाडयापहा ॥

आवाहन :–

भगवती सरस्वती का ध्यान करने के बाद बही-खाते के सम्मुख आवाहन मुद्रा दिखाकर निम्न मन्त्र पढते हुए उनका आवाहन करे । आगच्छ देव-देवेशि । तेजोमयि सरस्वति ॥ श्री सरस्वती देवीं आवाहयामि ॥

निम्न मन्त्र पढ़कर उनके आसन के लिए पाच पुष्प अञ्जलि में लेकर अपने सामने रक्खे बही-खाते के निकट छोड़े ।

नाना रत्न समायुक्तं कार्त-स्वर विभूषितम् ।
आसनं देव देवेशि । प्रीत्यर्थं प्रति गृह्यताम् ॥
श्री सरस्वती देव्यै आसनार्थे पञ्च पुष्पाणि समर्पयामि ॥

भगवती सरस्वती के आसन के लिये पांच पुष्प अर्पित करता हूँ । इसके बाद चन्दन अक्षत पुष्प धूप दीप नैवेद्य से भगवती सरस्वती का पूजन निम्न मन्त्रों द्वारा करे ।

ॐ श्री सरस्वती देव्यै नमः पादयोः पाद्यं समर्पयामि ।
ॐ श्री सरस्वती देव्यै नमः शिरसि अर्घ्यं समर्पयामि ।
ॐ श्री सरस्वती देव्यै नमः गंधाक्षतं समर्पयामि ।
ॐ श्री सरस्वती देव्यै नमः पुष्पं समर्पयामि ।

ॐ श्री सरस्वती देव्यै नमः धूपं आघ्रापयामि।

ॐ श्री सरस्वती देव्यै नमः दीपं दर्शयामि।

ॐ श्री सरस्वती देव्यै नमः नैवेद्यं समर्पयामि।

ॐ श्री सरस्वती देव्यै नमः आचमनीयं समर्पयामि।

ॐ श्री सरस्वती देव्यै नमः ताम्बूलं समर्पयामि।

इस प्रकार पूजन करने के बाद बाएं हाथ में गंध अक्षत पुष्प लेकर दाहिने हाथ द्वारा निम्न मन्त्र पढते हुए बही-खाते पर छोड़े।

ॐ वीणा पुस्तक धारिण्यै श्री सरस्वत्यै नमः।

अनेन पूजनेन श्री सरस्वती देवी प्रीयताम् नमो नमः॥

गंधादि पुष्प अक्षत उपचारों से पूजन करे।

प्रार्थना करें।

ॐ शारदा शारदम्भोज वदना वदनाम्बुजे।

सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्॥

कुबेर पूजनम् – तिजोरी अथवा रुपये रखे जानेवाले सन्दूक आदि को स्वस्तिकादि से अलङ्कृत कर उसमें निधिपति कुबेर का आवाहन करे – आवाहन मुद्रा दिखाकर – उन पर मोली बांध कर कुबेर का पूजन करे।

ध्यान –

मनुज-बाह्य विमान् स्थितम्।

गरूड-रत्न निभं निधि नायकम्॥

शिव-सखं मुकुटादि विभूषितम्।

वर गढे दधतं भजे तुन्दिलम्॥

भगवान श्री कुबेर का ध्यान करने के बाद तिजोरी, सन्दूक आदि के सम्मुख आवाहन-मुद्रा दिखाकर निम्न मन्त्र द्वारा उनका आवाहन करे।

आवाहयामि देव ! त्वामिहायाहि कृपां कुरु।

कोशं वर्द्धय नित्यं त्व परि रक्ष सुरेश्वर॥

श्री कुबेर देवम् आवाहयामि॥

आवाहन करने के बाद निम्न मन्त्र पढ़कर श्री कुबेर देव के आसन के लिये पांच पुष्प अञ्जलि में लेकर अपने सामने तिजोरी-सन्दूक आदि के निकट छोड़े ।

नाना-रत्न-समायुक्तं कार्त-स्वर विभूषितम् ।
आसनं देव-देवेश ! प्रीत्यर्थं प्रति गृह्यताम् ॥
श्री कुबेर देवाय आसनार्थे पञ्च पुष्पाणि समर्पयामि ॥

भगवान् श्री कुबेर के आसन के लिए मैं पांच पुष्प अर्पित करता हूं । इसके बाद चन्दन, अक्षत पुष्प धूप दीप नैवेद्य से भगवान कुबेर का पूजन करे ।

ॐ श्री कुबेराय नमः पादयोः पाद्यं समर्पयामि ।
ॐ श्री कुबेराय नमः शिरसि अर्घ्यं समर्पयामि ।
ॐ श्री कुबेराय नमः गंधाक्षतं समर्पयामि ।
ॐ श्री कुबेराय नमः पुष्पं समर्पयामि ।
ॐ श्री कुबेराय नमः धूपांघ्रापयामि ।
ॐ श्री कुबेराय नमः दीपं दर्शयामि ।
ॐ श्री कुबेराय नमः नैवेद्यं समर्पयामि ।
ॐ श्री कुबेराय नमः आचमनीयं समर्पयामि ।
ॐ श्री कुबेराय नमः ताम्बूलं समर्पयामि ।
ॐ श्री कुबेराय नमः अनेन पूजनेन श्री धनाध्यक्ष
श्री कुबेरः श्री प्रीयताम् नमो नमः । प्रार्थना करे –
धनदाय नमस्तुभ्यंनिधि पद्माधिपाय च ।
भगवान त्वत्प्रसादेन धनधान्यादि सम्पदः ॥
धनाध्यक्षाय देवाय नरयानोपवेशिने ।
नमस्ते राजराजाय कुबेराय महात्मने ॥

इस प्रकार प्रार्थना कर पूर्व पूजित हल्दी धनिया कमल गट्टा द्रव्य दूर्वादि से युक्त थैली, तिजोरी में रखे ।

तुला तथा मान पूजा :–

सिन्दूर से सांतिया करके मोली लपेट कर तुलाधिष्ठातृ देवता का ध्यान करना चाहिये ।

नमस्ते सर्व देवानां शक्तित्वे सत्यमाश्रिता ।
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना ॥

ॐ तुलाधिष्ठातृ देवतायै नमः ॥ इस नाम मन्त्र से गन्धाक्षतादि उपचारों द्वारा पूजन कर नमस्कार करे ॥

प्रार्थना :–

ॐ विपणि त्वं महादेवी धनधान्य प्रवर्द्धनी ।
मद् गृहे सुयशो देहिधन धानादिकं तथा ॥
आयुः पशून्प्रजां देहि सर्वसम्पत्करी भव ॥

दीपमालिका (दीपक) पूजनम् :–

किसी पात्र में ग्यारह इक्कीस या उससे अधिक दीपकों को प्रज्ज्वलित कर महालक्ष्मी के समीप रख कर उस दीपज्योति का "ॐ दीपावल्यै नमः" इस नाम मन्त्र से गन्धादि उपचारों द्वारा पूजन कर इस प्रकार **प्रार्थना करे –**

ध्यानम् :–

भो दीप ! ब्रह्म रूपस्त्वं ह्यन्धकार विनाशकः ।
गृहाण मया कृतां पूजां, ओजस्तेजः प्रवर्धय ॥

प्रार्थना करे :–

त्वं ज्योतिस्त्वं रविश्चन्द्रो विद्युदग्निश्च तारका ।
सर्वेषां ज्योतिषां ज्योतिर्दीपावल्यै नमो नमः ।
शुभं करोतु कल्याणमारोग्यं सुख सम्पदाम् ।
मम बुद्धि प्रकाशं च दीप-ज्योतिर्नमोऽस्तुते ॥
शुभं भवतु कल्याणमारोग्यं पुष्टि-वर्धनम् ।
आत्म तत्त्व-प्रबोधाय दीप ज्योतिर्नमोऽस्तु ते ॥

दीपावलिर्मया दत्ता गृहाणत्वं सुरेश्वरि।
अनेन दीप दानेन ज्ञान दृष्टि प्रदा भव॥

दीप मालिकाओं का पूजन कर अपने आचार के अनुसार संतरा, ईख पानी फल धान का लावा इत्यादि पदार्थ चढाये। धान का लावा (खील) गणेश महालक्ष्मी तथा अन्य देवी देवताओं को भी अर्पित करे। अन्त में सभी दीपकों को प्रज्ज्वलित कर सम्पूर्ण गृह अलंकृत करे।

प्रधान आरती – इस प्रकार भगवती महालक्ष्मी तथा उनके सभी अङ्ग प्रत्यङ्गों एवं उपाङ्गों का पूजन कर लेने के अनन्तर प्रधान आरती करनी चाहिये। इसके लिये एक थाली में स्वस्तिक आदि मांगलिक चिह्न बनाकर अक्षत तथा पुष्प के आसन पर किसी दीप आदि में घृतयुक्त बत्ती प्रज्ज्वलित करे। एक पृथक पात्र में कपूर प्रज्ज्वलित कर वह पात्र थाली में यथा स्थान रख ले। आरती थाल का जल से प्रोक्षण कर ले।

आरती –

ॐ चक्षुर्द सर्व लोकानां तिमिरस्य निवारणं।
आर्तिक्यं कल्पितं भक्त या गृहाण परमेश्वरी॥
देवि प्रपन्नार्ति हरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वंत्वमीश्वरी देवि चराचरस्य॥
नीराजनं सुमाङ्गल्यं कर्पूरेण समन्वितम्।
चन्द्रार्क वह्नि सदृशं महादेवि नमोऽस्तुते॥
कर्पूरगौरं करुणावतारंसंसारसारं भुजगेन्द्रहारम्।
सदावसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि॥

श्री लक्ष्मीजी की आरती

ॐ जय लक्ष्मी माता (मैया) जय लक्ष्मी माता ।
तुमको निसिदिन सेवत हर-विष्णु धाता ॥ॐ जय ॥

उमा रमा ब्रह्माणी तुम ही जग माता ।
सूर्य चन्द्रमा ध्यावत नारद ऋषि गाता ॥ॐ जय ॥

दुर्गा रूप निरञ्जनि सुख-सम्पति-दाता ।
जो कोई तुम को ध्यावत, ऋद्धि सिद्धि धन पाता ॥ॐ जय ॥

तुम पाताल-निवासिनि, तुम ही शुभ दाता ।
कर्म-प्रभाव-प्रकाशिनि भवनिधि की त्राता ॥ॐ जय ॥

जिस घर तुम रहती तँह सब सद्गुण आता ।
सब सम्भव हो जाता, मन नहिं घबराता ॥ॐ जय ॥

तुम बिन यज्ञ न होते, वस्त्र न हो पाता ।
खान पान का वैभव सब तुम से आता ॥ॐ जय ॥

शुभ गुण मन्दिर सुन्दर क्षीरोदधि जाता
रत्न चतुर्दश तुम बिन कोई नहि पाता ॥ॐ जय ॥

महालक्ष्मी जी की आरति, जो कोई नर गाता ।
उर आनन्द समाता, पाप उतर जाता ॥ॐ जय ॥

मन्त्र-पुष्पाञ्जलि –

दोनों हाथो में कमल आदि के पुष्प लेकर हाथ जोड़कर निम्न मन्त्रों का पाठ करे ।

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ ॐ राजाधि राजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु कुबेराय वैश्रवणाय महाराजाय नमः ।

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषान्ता दापरार्धात् । पृथिव्यै समुद्र पर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरूतः परिवेष्टारो मरूत्तस्यावसन् गृहे । आविक्षितस्य काम प्रेर्विश्वेदेवाः सभासद इति ।

ॐ विश्वतश्चक्षुरूत विश्व तो मुखो विश्वतो बाहुरूत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैद्यावाभूमी जनयन् देव एकः ॥
महालक्ष्म्यै च विद्महे विष्णु पत्न्यैच धीमहि तन्नो लक्ष्मीः प्रचोदयात् ॥
ॐ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजन प्रभवस्य लज्जा ।
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥
ॐ महालक्ष्म्यै नमः मन्त्र पुष्पाञ्जलिं समर्पयामि ॥

(हाथ में लिये फूल महालक्ष्मी पर चढा दें । प्रदक्षिणा कर साष्टाङ्ग प्रणाम करें ।

प्रदक्षिणा :–

ॐ यानि कानि च पापानि जन्मान्तर कृतानि च ॥
तानि तानि. विनश्यन्ति प्रदक्षिणा पदे पदे ॥
अन्यथा शरणं नास्ति त्वमेष शरणं देवि ।
तस्मात् कारुण्य-भावेन, क्षमस्व परमेश्वरि ॥
श्री महालक्ष्मी देव्यै प्रदक्षिणां समर्पयामि ॥

साष्टाङ्ग प्रणाम मन्त्र :–

ॐ नमः सर्व हितार्थाय जगदाधार हेतवे ।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मयाकृतः ॥
ॐ भवानि ! त्वं महालक्ष्मीः सर्व काम प्रदायिनि ।
प्रसन्ना सन्तुष्टा भव देवि ! नमोऽस्तु ते ॥
अनेन पूजनेन श्री लक्ष्मी देवी प्रीयताम् नमो नमः ॥

क्षमा-प्रार्थना :-

नमस्ते सर्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सामेभूयात्त्वदर्चनात् ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वरि ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥
यत्पूजितं मया देवि परिपूर्ण तदस्तु मे ॥
त्वमेव माताच पिता त्वमेव । त्वमेव बन्धुश्चसखात्वमेव ॥
त्वमेव विद्या द्रविणं त्वमेव । त्वमेव सर्वं मम देव देव ॥
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहिमां परमेशानि सर्वपापहरा भव ॥
अपराध सहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥
सरसिजनिलये सरोजहस्ते, धवलतरांशुक गंध माल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥

पुनः प्रणाम करके ॐ अनेन यथाशक्त्यर्चनेन श्री महालक्ष्मीः प्रसीदति । यह कह कर जल छोड दे । ब्राह्मण एवं गुरुजनों को प्रणाम कर चरणामृत तथा प्रसाद वितरण करे ।

विसर्जन :-

पूजन के अन्त में हाथ में अक्षत लेकर नूतन गणेश एवं महालक्ष्मी की प्रतिमा को छोड़ कर अन्य सभी आवाहित प्रतिष्ठित एवं पूजित देवताओं को अक्षत छोडते हुए निम्न मन्त्र से विसर्जित करे –

यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ।
इष्टकाम समृद्धयर्थं पुनरागमनाय च ॥

• • •

श्री महालक्ष्मी ध्यानम् :-

वन्दे पद्मकराम् प्रसन्नवदनाम् भक्ताभीष्ट फलप्रदाम् हरिहर
सौभाग्यदाम् भाग्यदाम् ब्रह्मादिभिः सेविताम्
हस्ताभ्याम् अभयप्रदाम् मणिगणैः पार्श्वं पङ्कज शङ्ख पद्मनिधिभिः
नानाविधैः भूषिताम् युक्ताम् सदा शक्तिभिः ॥

अस्मिन् दीपे मङ्गलरूपां महालक्ष्मीं आवहयामि ॐ महालक्ष्म्यै नमः महालक्ष्मीम् ध्यायामि आसनं समर्पयामि अर्घ्यं समर्पयामि पाद्यं समर्पयामि गन्धान् धारयामि स्वर्णपुष्पं समर्पयामि दीपं दर्शयामि कदली फलं निवेदयामि ताम्बूलं समर्पयामि सर्वोपचारार्थम् अक्षतान् समर्पयामि अष्टोत्तरशत संख्यया/सहस्त्र संख्यया नामावल्या कुंकुम अर्चनां करिष्ये ।

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरंगधामेश्वरीं,
दासीभूत समस्त देव वनितां लोकैक दीपांकुराम्
श्रीमन्मन्द कटाक्षलब्ध विभव ब्रह्मेन्द्र गङ्गाधरां,
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥

श्री लक्ष्मी सहस्त्र नामावलिः

ॐ श्रियै नमः । ॐ वासुदेवमहिष्यै नमः । ॐ पुंप्रधानेश्वर्यै नमः ।
ॐ अचिंत्यानन्तविभवायै नमः । ॐ भावाभावविभाविन्यै नमः ।
ॐ अहंभावात्मिकायै नमः । ॐ पद्मायै नमः । ॐ शान्तानन्तजितात्मिकायै नमः ।
ॐ ब्रह्मभावंगतायै नमः । ॐ त्यक्तभीतायै नमः । ॐ सर्वजगन्मय्यै नमः ।
ॐ षाड्गुण्यपूर्णायै नमः । ॐ त्रव्यन्तरूपायै नमः । ॐ आत्मानपगामिन्यै नमः ।
ॐ एकयोग्यायै नमः । ॐ अशून्यभावाकृत्यै नमः । ॐ तेजःप्रभाविन्यै नमः ।
ॐ भाव्याभावकभावायै नमः । ॐ आत्मभाव्यायै नमः । ॐ कामदुहे नमः ।
ॐ आत्मभुवे नमः । ॐ भावाभावमय्यै नमः । ॐ दिव्यायै नमः ।
ॐ भेद्यभेदकभावगायै नमः । ॐ जगत्कुटुम्बिन्यै नमः । ॐअखिलाधारायै नमः ।
ॐ कामविजृम्भिण्यै नमः । ॐ पञ्चकृत्यकर्यै नमः । ॐ पञ्चशक्तिमय्यै नमः ।

ॐ आत्मवल्लभायै नमः। ॐ भावाभावानुगायै नमः। ॐ सर्वसम्मतायै नमः।
ॐ आत्मोपगूहिन्यै नमः। ॐ अपृथक्चारिण्यै नमः। ॐ सौम्यायै नमः।
ॐ सौम्यरूपायै नमः। ॐ अव्यवस्थितायै नमः। ॐ आद्यन्तरहितायै नमः।
ॐ देव्यै नमः। ॐ भवभाव्यस्वरूपिण्यै नमः। ॐ महाविभूत्यै नमः।
ॐ समतां गतायै नमः। ॐ ज्योतिर्गणेश्वर्यै नमः। ॐ सर्वकार्यकर्यै नमः।
ॐ धर्मस्वभावायै नमः। ॐ आत्माग्रतःस्थितायै नमः। ॐ आज्ञासमविभक्ताङ्ग्यै नमः। ॐ ज्ञानानन्दक्रियामय्यै नमः। ॐ स्वातन्त्र्यरूपायै नमः।
ॐ देवोरःस्थितायै नमः। ॐ तद्धर्मधर्मिण्यै नमः। ॐ सर्वभूतेश्वर्यै नमः।
ॐ सर्वभूतमात्रे नमः। ॐ आत्ममोहिन्यै नमः। ॐ सर्वाङ्गसुन्दर्यै नमः।
ॐ सर्वव्यापिन्यै नमः। ॐ प्राप्तयोगिन्यै नमः। ॐ विमुक्तिदायिन्यै नमः।
ॐ भक्तगम्यायै नमः। ॐ संसारतारिण्यै नमः। ॐ धर्मार्थवादिन्यै नमः।
ॐ व्योमनिलयायै नमः। ॐ व्योमविग्रहायै नमः। ॐ पञ्चव्योमपद्यै नमः।
ॐ रक्षव्यावृत्यै नमः। प्राप्यपूरिण्यै नमः। ॐ आनन्दरूपायै नमः।
ॐ सर्वाप्तिशालिन्यै नमः। ॐ शक्तिनायिकायै नमः। ॐ हिरण्यवर्णायै नमः।
ॐ हैरण्यप्राकारायै नमः। ॐ हेममालिन्यै नमः। ॐ प्रस्फुरत्तायै नमः।
ॐ भद्रहोमायै नमः। ॐ वशिन्यै नमः। ॐ रजतस्रजायै नमः।
ॐ स्वाज्ञाकार्यमरायै नमः। ॐ नित्यसुरभ्यै नमः। ॐ व्योमचारिण्यै नमः।
ॐ योगक्षेमवहायै नमः। ॐ सर्वसुलभायै नमः। ॐ इच्छाक्रियात्मिकायै नमः।
ॐ महासमूहायै नमः। ॐ निखिलप्ररोहायै नमः। ॐ वेदगोचरायै नमः।
ॐ विस्मयाधायिन्यै नमः। ॐ ब्रह्मसंहितायै नमः। ॐ सुगुणोत्तरायै नमः।
ॐ प्रज्ञापरिमितायै नमः। ॐ आत्मानुरूपायै नमः। ॐ सत्योपायार्जितायै नमः।
ॐ मनोज्ञेयायै नमः। ॐ ज्ञानगम्यायै नमः। ॐ नित्यमुक्तायै नमः।
ॐ आत्मसेविन्यै नमः। ॐ कर्तृशक्त्यै नमः। ॐ सुगहनायै नमः।
ॐ भोक्तृ शक्त्यै नमः। ॐ गणप्रियायै नमः। ॐ ज्ञानशक्त्यै नमः। (१००)
ॐ अनौपम्यायै नमः। ॐ परशक्त्यै नमः। ॐ निरामयायै नमः।
ॐ अकलङ्कायै नमः। ॐ महाशक्त्यै नमः। ॐ निराधारायै नमः।

ॐ विकासिन्यै नमः ।ॐ महामायायै नमः । ॐ महानन्दायै नमः ।
ॐ ब्रह्मानीत्यै नमः । ॐ निराश्रयायै नमः । ॐ एकस्वरूपायै नमः ।
ॐ त्रिविधायै नमः । ॐ संख्यातीतायै नमः । ॐ निरन्जनायै नमः ।
ॐ आत्मसत्तायै नमः । ॐ नित्यशुचये नमः । ॐ निर्विकल्पायै नमः ।
ॐ सुखोचितायै नमः । ॐ नित्यशान्तायै नमः । ॐ ओं निस्तरङ्गायै नमः ।
ॐ निर्भिन्नायै नमः । ॐ सर्वभेदिन्यै नमः । ॐ असंकीर्णायै नमः ।
ॐ अविधेयात्मने नमः । ॐ निषेध्दयायै नमः । ॐ सर्वपावन्यै नमः ।
ॐ निष्कामनायै नमः । ॐ सर्वरसायै नमः । ॐ अभेद्दायै नमः ।
ॐ सर्वार्थसाधिन्यै नमः । ॐ अनिर्देश्यायै नमः । ॐ अपरिमितायै नमः ।
ॐ निर्विकारायै नमः । ॐ त्रिलक्षणायै नमः । ॐ अभयङ्कर्यै नमः ।
ॐ स्त्रीस्वरूपायै नमः । ॐ अव्यक्तायै नमः । ॐ सदसदाकृत्यै नमः ।
ॐ अप्रतर्क्यायै नमः । ॐ अप्रतिहतायै नमः । ॐ नियन्त्रयै नमः ।
ॐ यंत्रवाहिन्यै नमः । ॐ हार्दमूर्त्यै नमः । ॐ महामूर्त्यै नमः ।
ॐ अव्यक्तायै नमः ।ॐ विश्वगोपिन्यै नमः । ॐ वर्धमानायै नमः ।
ॐ अनवद्दाङ्ग्यै नमः । ॐ निरवद्दायै नमः । ॐ त्रिवर्गदायै नमः ।
ॐ अप्रमेयायै नमः । ॐ अमृतदुधायै नमः । ॐ कूटस्थायै नमः ।
ॐ कुलनन्दिन्यै नमः । ॐ अविगीतायै नमः । ॐ तन्त्रसिध्दायै नमः ।
ॐ योगसिध्दायै नमः । ॐ अमरेश्वर्यै नमः । ॐ विश्वसूत्यै नमः ।
ॐ तर्पयन्त्यै नमः । ॐ नित्यतृप्तायै नमः । ॐ महोषध्यै नमः ।
ॐ शब्दात्ययायै नमः । ॐ शब्दसहायै नमः ।ॐ कृतज्ञायै नमः ।
ॐ कृतलक्षणायै नमः । ॐ त्रिवर्तिन्यै नमः । ॐ त्रिलोकस्थायै नमः ।
ॐ भूर्भुस्वरयोनिजायै नमः । ॐ अग्राह्यायै नमः । ॐ अग्राहकायै नमः ।
ॐ अनन्ताह्वयायै नमः । ॐ सर्वातिशायिन्यै नमः । ॐ व्योमपद्दायै नमः ।
ॐ कृतधुरायै नमः । ॐ पूर्णकामायै नमः । ॐ महेश्वर्यै नमः ।
ॐ सुवाच्यायै नमः । ॐ वाचिकायै नमः । ॐ सत्यकथनायै नमः ।
ॐ सर्वपावन्यै नमः । ॐ लक्ष्यमाणायै नमः । ॐ लक्षयन्त्यै नमः ।

ॐ जगज्ज्येष्ठायै नमः। ॐ शुभावहायै नमः। ॐ जगत्प्रतिष्ठायै नमः।
ॐ भुवनभर्त्र्यै नमः। ॐ गूढप्रभाविन्यै नमः। ॐ क्रियायोगात्मिकायै नमः।
ॐ मूर्तायै नमः। ॐ हृदब्जस्थायै नमः। ॐ महाक्रमायै नमः।
ॐ परमदिवे नमः। ॐ प्रथमजायै नमः। ॐ परमाप्तायै नमः।
ॐ जगन्निधयै नमः। ॐ आत्मानपायिन्यै नमः। ॐ तुल्यस्वरूपायै नमः।
ॐ समलक्षणायै नमः। (२००)
ॐ तुल्यवृत्तायै नमः। ॐ समवयसे नमः। ॐ मोदमानायै नमः।
ॐ खगध्वजायै नमः। ॐ तुल्यचेष्टायै नमः। ॐ तुल्यशीलायै नमः।
ॐ वरदायै नमः। ॐ कामरूपिण्यै नमः। ॐ समग्रलक्षणायै नमः।
ॐ अनन्तायै नमः। ॐ तुल्यभूत्यै नमः। ॐ सनातनायै नमः। ॐ महर्द्धये नमः।
ॐ सत्यसंकल्पायै नमः। ॐ भूमिजायै नमः। ॐ परमेश्वर्यै नमः।
ॐ जगन्मात्रे नमः। ॐ सूत्रवत्यै नमः। ॐ भूतधात्र्यै नमः। ॐ यशस्विन्यै नमः।
ॐ महाभिलाषायै नमः। ॐ सावित्र्यै नमः। ॐ प्रधानायै नमः।
ॐ सर्वभासिन्ये नमः। ॐ नानावपुषे नमः। ॐ बहुविधायै नमः।
ॐ सर्वज्ञायै नमः। ॐ पुण्यकीर्तनायै नमः। ॐ भूताश्रयायै नमः।
ॐ हृषीकेशायै नमः। ॐ अशोकायै नमः। ॐ अङ्गिवाहिकायै नमः।
ॐ ब्रह्मात्मिकायै नमः। ॐ पुण्यजन्यै नमः। ॐ सत्यकामायै नमः।
ॐ समाधिभुवे नमः। ॐ हिरण्यगर्भायै नमः. ॐ गम्भीरायै नमः।
ॐ गोधूल्यै नमः। ॐ कमलासनायै नमः। ॐ जितक्रोधायै नमः।
ॐ कुमुदिन्यै नमः। ॐ वैजयन्त्यै नमः। ॐ मनोजवायै नमः।
ॐ धनलक्ष्म्यै नमः। ॐ स्वस्तिकर्यै नमः। ॐ राज्यलक्ष्म्यै नमः।
ॐ महासत्यै नमः। ॐ जयलक्ष्म्यै नमः। ॐ महागोष्ठयै नमः।
ॐ मघोन्यै नमः।ॐ माधवप्रियायै नमः। ॐ पद्मगर्भायै नमः।
ॐ वेदवत्यै नमः। ॐ विविक्तायै नमः। ॐ परमेष्ठिन्यै नमः।
ॐ सुवर्णबिन्दवे नमः। ॐ महत्यै नमः। ॐ महायोगिप्रियायै नमः।
ॐ अनघायै नमः। ॐ पद्मे स्थितायै नमः। ॐ वेदमय्यै नमः।

ॐ कुमुदायै नमः । ॐ जयवाहिन्यै नमः । ॐ संहत्यै नमः ।
ॐ निर्मितायै नमः । ॐ ज्योतिषे नमः । ॐ नियत्यै नमः ।
ॐ विविधोत्सवायै नमः । ॐ रुद्रवन्द्यायै नमः । ॐ सिन्धुमत्यै नमः ।
ॐ वेदमात्रे नमः । ॐ मधुव्रतायै नमः । ॐ विश्वम्भरायै नमः ।
ॐ हेमवत्यै नमः । ॐ समुद्रायै नमः । ॐ इच्छाविहारिण्यै नमः ।
ॐ अनुकूलायै नमः । ॐ यज्ञवत्यै नमः । ॐ शतकोट्यै नमः ।
